विषयेषु प्रणता रसादिषु, नेति प्रतिषेधे, आरंभपरिग्रहेषु ये न नता ते जानंति समाहितं, त एव ज्ञानवन्तः ये सम्यङ्मार्गाश्रिताः, न तु अज्ञानिनो, न वा समाधिं जाणंति, समाधिर्नाम रागद्वेषपरित्यागः, स एवं समाधिमार्गावस्थित, **'णो काहिएँ होज्जा संजते'** वृत्तं ॥१३८॥ कथयतीति कथकाः अक्खाणगाणि गोयरग्गगतो उवस्सयगतो वा अप्रतिमानानि कथयति कथिकः, पासणीओ णाम गिहीणं व्यवहारेषु पणियगादिसु वा प्राश्निको, न भवति, अपाया तत्थ जो जिवति तस्स अप्पियं भवति, संपसारको नाम संप्रसारकः, तद्यथा इमं वरिसं किं देवो वासिस्सति णवत्ति, किं भंडं अग्घिहिति वा न वा ?, उभयथापि दोषः, अधिकरणसंभवात्, अग्घिहिति णवत्ति, 'नच्चा धम्मं अणुत्तरं' एवंविधेन न भाव्यं, कतकिरिओ णाम कृतं परैः कर्म्म पुट्ठो अपुट्ठो वा भणति शोभनमशोभनं वा एवं कर्त्तव्यमासीत् नवेति वा, मामको णाम ममीकारं करोति देशे गामे कुले वा एगपुरिसे वा, किंच-अयं चान्यः कर्म्मविदालनोपायः, तद्यथा-**'छण्णं च पसंस णो करे०'** वृत्तं ॥१३९॥ द्रव्यच्छन्नं निधानादि भावच्छन्नं-माया, भृशं पसंसा-प्रार्थना लोभः उक्कोसो-मानः प्रकाशः-क्रोधः, स हि अन्तर्गतोऽपि नेत्रवक्त्रादिभिर्विकारैरुपलक्ष्यते, उक्तं हि-"कुद्धस्स खरा दिट्ठी" य एवं कषायनिग्रहोद्यताः तेसिं सुविवेकः गृहदारादिभ्यो विवेको बाह्योऽभ्यन्तरस्तु कषायविवेकः, आहितं-आख्यातं, सुविवेगोत्ति वा सुणिक्खंतं वा सुपव्वज्जत्ति वा एगट्ठं, भृशं नता प्रणताः, कुत्र नता ?, धर्म्मे वा 'सुज्झोसितं'ति जुषी प्रीतिसेवनयोः, धूयतेऽनेनेति धूतं-ज्ञानादि संयमो वा येषां सुज्झोसितं-स्वभ्यस्तं तेसिं सुविवेगमाहिते। स एवं विदालनामार्गमाश्रितः **'अणिहे सहिते सुसंवुडे०'** वृत्तं ॥ १४० ॥ अनिहो नाम अनिहतः परीषहैस्तपःकर्म्मसु वा नात्मानं विधयति, ज्ञानादिषु सम्यगाहितः णाणादीहि ३ आत्मनि वा हितः सहितः, अथवा यस्त्रिगुप्तः स समाहितो, धर्म्मेण यस्यार्थः स भवति धम्मट्ठी तवोवधाणवीरीय-

संयुक्तः तवे बारसविधे, स एवं गुणजुत्तो 'विहरेज्ज समाहितेंदिए' अनियतवासित्वं गृह्यते, समाहितो, निगृहीतेन्द्रियत्वं च, उक्तं हि–"सद्देसु य भद्दयपावएसु, सोतव्विसयं उवगतेसु । तुट्ठेण व रुट्ठेण व समणेण सया ण होयव्वं ॥१॥" एवं सेसिन्दियविसएसुवि, स्यात्–किमर्थं एवंविधः प्रयत्नः क्रियते अतिदुःखश्च ?, उच्यते, 'आतहितं दुक्खेण लब्भते' तंजहा–'माणुस्सखेत्त जाती' गाथा ॥ स्यात्–कथं अनादिमति संसारे अयमात्मा न पूर्वमेवानेन पथा प्रयात इति ?, उच्यते 'णहि णूण पुरा अणुस्सुतं०' वृत्तं ॥१४१॥ नेति प्रतिषेधे, हि पादपूरणे, नूनमनुमाने, पुरा इति क्रमात् अतिक्रान्तकालग्रहणं, अनुगतं श्रुतं अनुश्रुतं, किंच तत् ?, उच्यते, वक्ष्यते हि–मुणिणा सामाइयं पदं, अथवा मुणेत्तावि अवितहं णो अधिट्ठितं, अवितहं णाम यथावत्, अधिट्ठितं णाम करणे, तदिदं मुनिना सामाइयं पदं आख्यातं इत्यर्थः, समता सामाइयं, तच्च अनेकप्रकारं, कतरेण मुनिना तदाख्यातं ?, 'णातएण जगसव्वदंसिणा'जगे सव्वं पस्सति जगसव्वदंसी,'एवं माता(मत्ता)महन्तरं०'वृत्तं ॥१४२॥ एवमधारणे, महन्तरं मत्वा-ज्ञात्वा, तत् कस्य कयोः केषां वा ?, उच्यते, सुत्तस्स य असुत्तस्स य, विरतीए अविरतीए, मोक्खसुहस्स संसारसुहस्स य सच्छासननयस्य मिथ्यादर्शनानां च, अथवा इमं धम्मं महत्तरं मत्वा कुप्रवचनेभ्यः, सहिता नाम ज्ञानादिभिः, बहवो जना इति अणंतातीतकाले सिद्धाः संपदं च, 'गुरुणो छंदाणुवत्तगा' गुरवः-तीर्थकरादयः छंदः-अभिप्रायः विरता भूत्वा विषयकषायेभ्यः तीर्णा भवौघं तरंति च, द्रव्यौघः समुद्रः भावौघस्तु संसारः, आहितमाख्यातं कथितमित्येकोऽर्थः इति वैतालीये द्वितीयोद्देशकः २–२ ॥

सूयणाधिकारे प्रस्तुते विदारणाधिकारोऽनुवर्त्तते, उक्तं हि–'उद्देसगंमि ततिए अण्णाणचियस्स अवचयो होहि । स च सुहसातस्स ण भवति, परीषहसहिष्णोर्भवति, स कथं ?, उच्यते 'संवुडकम्मस्स भिक्खुणो०' वृत्तं ॥१४३॥ संवृतानि यस्य प्राणव-

अस्य पृष्ठे द्वितिय् अध्ययनस्य तृतिय उद्देशक: आरभ्यते

धादीनि कर्म्माणि स भवति संवुडकम्मा, इन्द्रियाणि वा यस्य संवृतानि स भवति संवृतः, निरुद्धानीत्यर्थः, यस्य वा यत्नवतः चंकमणादीनि कम्माणि संवृतानि, अथवा मिथ्यादर्शनाविरतिप्रमादकषाययोगा यस्य संवृता भवंति स संवृतकर्म्मा, भिक्खणसीलो भिक्खू, जमिति अणिद्दिट्ठस्स णिद्देसे, दुक्खमिति कम्मं, पुट्ठं णाम बद्धपुट्ठणिधत्तणिकाइतं, अबोधिए णाम अण्णाणेण धम्मं अवुज्झमाणेणं, यावन्न तावत् सुवुध्यते स तं संजमतो विवज्जति, तं पंचणालिविहाडिततडागदृष्टान्तेन, निरुद्धेसु च नालिकामुखेषु वातातापेनापि शुष्यते, ओसिच्चमाणं च सिग्घतरं सुक्खति, एवं संयमेण निरुद्धाश्रवस्य पूर्वोपचितं कर्म्म क्षीयते, आह–तपः अभ्यन्तरं, एवं उक्तः, दशप्रकारेन्द्रियादिसंलीणता उक्ताः इंद्रियपडिसंलीनता जोगपडिसंलीणता कसायपडिसंलीणत्ता, संवृतात्मकस्तु अनशनावमौदर्यादितपोयुक्तस्य उत्सिच्यमानमिवोदकं क्षिप्रं कर्म्मापचीयते, सेलेसिं पडिवण्णो उक्कोसो संवुडो, मणुस्ससंतियं 'मरणं हेच्च वयंति पंडिता' मोक्खं, अथवा म्रियते येन तन्मरणं, तच्च कर्म्म संसारो वा, तं हित्वा व्रजंति मोक्षं तेनैव भवग्गहणेण व्रजंति तान् प्रतीत्यादिश्यते–'जे विण्णवणाहिं झूसिता' वृत्तं ॥१४४॥ विज्ञापयंति रतिकामा विज्ञाप्यन्ते वा मोहातुरैर्विज्ञापनाः–स्त्रियः, जुषी प्रीतिसेवनयोः, अजुषिता नाम अनाद्रियमाणा इत्यर्थः, विज्ञापनासु हि पंचापि विषयाः स्वाधीना शब्दादयः, उक्तं हि–'पुप्फफलाणं च रसं सुराएँ मंसस्स महिलियाणं च। जाणंता जे विरता ते दुक्करकारए वंदे ॥ १ ॥" संस्पृष्टा वा ताभिः, कौमारब्रह्मचारिणः ते 'संतिण्णेहि समं वियाहिता' सम्यक्तीर्णाः संवृतात्मानो भूत्वा संसारौघं तीर्णाः मोक्षं जिगमिषवोऽपि हि अतीर्णा अपि तीर्णा इव प्रत्यवसेयाः, विविधं आहिता वियाहिता 'तम्हा उड्ढंति पासध' तस्मादिति तस्मात्कारणात् यस्माद्विज्ञापनासु अजुषिता संतिण्णा हि समं वियाहिया, तीर्णमबन्धकत्वं च प्रति समाः, ऊर्द्धमिति मोक्षः तत्सुखं वा, तं

दृष्ट्वा कामभोगा द्रष्टव्या, एकार्बुदपरिश्रावणवत् व्रणालेपनबद्धा, पठ्यते च—'उड्ढं तिरियं अधे तथा' उड्ढं दिव्वा कामा अधे भवणवासिणं तिरियं तिरिक्खमणुस्सजोणिवाणमंतरा, ते तिविधेवि य दृष्ट्वा कामाणि रोगवत् अधिकं अत्यर्थं वा, यथा रोगा दुक्खावहा एवं कामा अपि, अट्ठविधकम्मरोगापत्तेः, सो भवति एवं, सेसावि आसवदाराणि जोएयव्वाणि, एयं संवुडत्तणं विरहं च कहं तरेज्ज ?, दिट्ठंतो 'अग्गं वणिएहि आहियं' वृत्तं ॥१४५॥ यदुत्तमं किंचित्तदग्गं, तद्यथा वर्णतः प्रकाशतः प्रभावतश्चेत्यादि, तच्च रत्नादि, तत्तु द्रव्यं वणिग्भिरानीतं राजानो धारयंति तत्प्रतिमा वा, तत्तु वस्त्रमाभरणादि वा, तथैव चाश्वो हस्ती स्त्री पुरुषो वा, यो वा यस्मिन् क्षेत्रे प्रधानं द्रव्यं धारयति, शब्दादिविषयोपगतः परिभुंक्त इत्यर्थः, राजस्थानीया जीवाः, जेहिं मिच्छत्तादि दोसे खवित्ता खयोवसममाणिता वा वारसविधा वा कसाया ते परमाणि महव्वतरयणाणि राईभोयणवेरमणछट्ठाणि राजान इवाग्राणि रत्नानि वणिग्भिरानीतानि धारयंतीति अग्रं प्राधान्यं, पूर्वदिग्निवासिनामाचार्याणामयमर्थः, अपरदिग्निवासिनस्त्वेवं कथयंति—ते जे विण्णवणाहिं अजोसिता संतिण्णेहि समं विहायिता तेन सर्व्व एवायं लोकः महाव्रतानि प्रतिपद्यते, उच्यते, 'अग्गं वणियेहि आहितं', अग्गाणि—वराणि रयणाति वणिग्भिरानीतानि धारयंति शतसाहस्राण्यनर्घ्याणि वा राजान एव धारयंति, तत्तुल्या तत्प्रतिमा वा, कियन्तो लोकेऽस्ति वणिजः क्रायिका वा, एवं परमाणि महव्वयाणि रत्नभूतान्यतिदुर्द्धराणि तेषामल्पा एवोपदेष्टारो धारयितारश्च,'जे इह सायाणुगा णरा' वृत्तं ॥१४६॥ जे इति अणिद्दिट्ठस्स णिद्देसे सायं अणुगच्छंतीति सायाणुगा—इहलोगपरलोगनिरवेक्खा, एवं इड्ढिरससायागारवेसु 'अज्झोववण्णा' अधिकं उपपण्णाः अज्झोववण्णा तस्मिन्नेव सोतिंदियादिए इच्छामदणकामेसु वा मुच्छिता—गिद्धा गढिता अज्झोववण्णा,'किमणेण समं पगब्भिता' ते हि अइयारेसु पसज्जमाणा यदा

परैश्चोद्यंते तदा ब्रुवते–किमनेन स्वल्पेण दोषेण भविष्यति ?, वितथं वा दुष्पडिलेहितदुब्भासितअणाउत्तगमणादि, एवं थोवे थोवं पावमायरंता पदे पदे विसीदमाणा सुबहून्यपि पापान्याचरंति, उक्तं च–'करोत्यादौ तावत्सघृणहृदयः किंचिदशुभं०' दिट्ठंतो जहा एगस्स सुद्धे वत्थे पंको लग्गो, सो चिंतेति–किमेत्तियं करिस्सतित्ति, तत्थेवाज्झवसितं, एवं वितियं मसिखेलसिंघाणगसिणेहादीहिं सव्वं मइलीभूतं, अथवा मणिकोट्टिमे चेडरूवेण सण्णा वोसिरिता, सा तत्थेव घट्टा, एवं खेलसिंघाणादीणिवि कताणि, किं करिस्संतित्ति तत्थेव तत्थेव घट्टाणि जाव तं मणिकोट्टिमं सव्वं लेक्खादीहिं–श्लेष्मादिभिः मलिनिभूतं दुर्गंधिगं च जातं, भद्दगमहिसोवि एत्थ दिट्ठंतो भाणितव्वो, आचंलक्खो राया दिट्ठंतो य, एवं पदे पदे विसीदंतो किमणेण दुब्भासितेण वा स्तोकत्वादस्य चरित्तपडस्स मलिणीभविस्सति जाव सव्वो चरित्तपडो मइलितो, अचिरेण कालेण चरित्तमणिकोट्टिमं वा 'णावि जाणंति समाहिमाहितं' ते हि णिच्छयणयतो अण्णाणिणो चेव लब्भंति, पदे पदे विसीदत्तणा जया साधम्मिएहिं परेहिं वा चोइता भवंति तदा 'वाहेण जहा व विच्छते' वृत्तं ॥ १४७ ॥ वाहो णाम लुद्धगो तेण सरेण तालितो मृगोऽन्यो वा स तेण ताव परद्धो यावत् श्रान्तश्चत्वारिवि पादे विन्यस्य व्यवस्थितः ततो मरणं चाप्तः, अयं तु सौत्रो दृष्टान्तः, वाहेण जहा वच्छते, वाहतीति वाहः—शाकटिकोऽन्यो वा 'यथे'ति येन प्रकारेण तेन वाहेन विषमतीर्थश्रान्तो वा अवहन् प्रतोदेन विविधं क्षतः, अबलो नाम क्षीणबलः, भरोद्वहनं श्रान्तो वा, गच्छतीति गौः, भृशं चोदितः, चोद्यमानोऽपि न शक्नोत्युद्वोढुं, जेण तस्य तहिं अप्पथामता 'तस्से'ति तस्य गोः तस्मिन्निति पांसुनिकरे विषमे वा, अप्पथामया णाम जेण अवहंतो तोत्तगप्पहारे सहति, जइ थामवं होन्तो तो ण तुत्तगप्पहारे सहंतो, सव्वत्थाप्यचयंतो खलु से तीक्ष्णैः प्रतोदाग्रैः तुद्यमानो अवसीदति, अथवा से 'अन्तए' अन्त्यावामप्यवस्थायां अन्तशः

॥ ९१ ॥

'णातिचए' ण सकेति, अवसो विसीदति, एवं सोवि संयमादिनिरुद्यमः 'एवं कामेसणा विदू' वृत्तं ॥१४८॥ एवमवधारणे, उक्ता 'कामैषणा' कामकाममार्गणा, विदुरिति विद्वान्, कामविपाकं विदन्निह परत्र च कामपिशाचपीड्यमानश्चिन्तयति 'अज्ज सुए पयहामि संथवं' संथवो नाम पुव्वावरसंबंधो तं संथवं अद्य श्वः परश्वो वा प्रहास्यामि, स हि तं संथवं उत्सिसृक्षुरपि मुमुक्षुरपि कुटुम्बभरणादिदुःखैरेव हि विवक्षतो गौरिव न शक्नोति उत्सृष्टुं, अथवोपदेश एवायं–'एवं कामेसणं विदू' वृत्तं, एवमनेन प्रकारेण कामयन्त इति कामाः, एषणा मार्गणैव, विदुरिति विद्वान्, नाविद्वान्, कुटुम्बभरणे दुस्त्यजान् मत्वा तत्र वा शक्नोति गौरिवावहन् तुष्यते कृषिपशुपाल्यादिषु च कर्म्मसु वर्त्तमानो बाध्यते, एवं बह्वपायान् कामान् मत्वा अज्ज वा सुते वा संथवं श्रुत्वा च संथवं 'कामी कामे ण कामए' कमणीयाः काम्यंते वा कामाः इच्छामेसुवि जहा पण्डुमधुरुत्तरमधुराइ भाया संयोगविप्पयोगा, णिमंतिज्जमाणो वा जहा–कण्णाए य धणेण य णिमंतियो जोव्वणंमि गहवतिणा। णेच्छति विणीतविणयो तं वइररिसिं णमंसामि ॥१॥ अलद्धे–असंते पत्थेति उवज्जिणित्ता भुंजीहामि 'कण्हुइ'त्ति क्वचित् ग्रामे वा पुरे वा, अथवा हीणोत्तममध्यमे उपदेशः क्रियते तेसु तेसु पमत्तस्स 'मा पच्छ असाधुता भवे' वृत्तं ॥१४९॥ मा सेति इयं असाधुता, लप्स्यते नाम हिंसादिकर्म्मप्रवृत्तिः मरणकाले तप्स्यते, परत्र वा, उक्तं हि–"जहा सागडिओ जाणं, सम्मं हेच्चा महापहं। विसमं मग्गमोतिण्णो, अक्खे भग्गंमि सोयते ॥ १ ॥ सोयए चेव बहुं, अपत्थं आमकं भोच्चा, राया रज्जं तु हारए।" एवं ज्ञात्वा 'अचेही अणुसास अप्पगं' अतीव अतीहि-अत्यन्तं क्रम इत्यर्थः, कुतः?–प्रमादात्, आत्मानमेवात्मना अनुशास्ति, किंच 'अधियं च असाधु सोयती' जधा असाधुता तहा तहाऽधिगं सोयति, इहापि ताव चोराती असाधूणि कम्माणि काउं गहिता सोयंति, किमु परत्र?, सूतंति च शरीरादिभिर्दुःखैर्बाध्यमानाः, शोचनं

मानसस्तापः, निस्तननं तु वाचिकं किंचि, कायिकं च, सर्वतस्तप्यते परितस्तप्यते बहिरंतश्च, कायवाङ्मनोभिर्वा बहुंति–अपरिमाणं पंकोसण्णनागवत्, किं च ‘इह जीवितमेव पस्सधा’ वृत्तं ॥ ९५० ॥ ‘इहे’ति इह मानुष्ये जीवति येन तत् जीवितं, एवमव-धारणे, तरुणगो णाम असंपूर्णवया वा अन्यो वा कश्चित्, पठ्यते च दुर्बलं वा, वाससयं परमायुः ततो ‘तिउट्टति’ छिद्यते प्रत्य-पायबहुलात्, वक्ष्यति हि–गब्भयमितिजंतित्ति गब्भया, ‘इत्तरवासं च बुज्झथा’ इत्तरमिति–अल्पकालमित्यर्थः, तं बुध्यत–अवगच्छत, एवमल्पेऽप्यायुषि बज्झपाये वा, तथापि नाम गृद्धा नरा कामेसु चिप्पित आक्रान्ता, न पुनरुत्तिष्ठंति तदुल्लंघनाय, किं-च ‘जे इह आरंभणिस्सिता’ वृत्तं ॥ १५१ ॥ जे इति अणिद्दिट्ठणिद्देसे, इहेति इह मनुष्यलोके, पाषंडिनोऽपी भूत्वा शाक्या-दयः आरंभे हिंसादि तण्णिस्सिता परदंडप्रवृत्ता आत्मानमपि दंडयंति, अथवा ण तेसिं इमो लोगो न परलोगो, तेनात्मानं दण्ड-यंति,‘एगंतलूसगा’ एगन्तहिंसगा इत्यर्थः, येऽपि स्वयं न घातयन्ति तेऽपि उद्दिश्यकृतभोजित्वाद्वधनमनुमन्यन्ते, एवंविधा ‘गंता ते पावलोगयं’ गंतारो नाम गमिष्यन्ति, पापानि पापो वा लोगः नरकः, ‘चिरकालं’ति बहूणि पलिओवगसागरोवमाणि, आसु-रिका दव्वे भावे य, आसूरियाणि न तत्थ सूरो विद्यते, अथवा एगिंदियाणं णत्थि जाव तेइंदिया असूरा वा भवंति, दिसन्ति दिश्यत इति दिग् दिग्गहणादट्ठादशप्रकारा भावदिक्, एवं गिहिणो विव इत्थं आरंभणिस्सिता आतदंडा एगंतलूसगा ते, न खंतिया, ‘ण य संखयमाहु जीवितं’ वृत्तं ॥१५२॥ असंस्करणीयं असंस्कृतं, उक्तं हि–‘दंडकलितं करेन्ता वचंति हु राइणो य दिवसा य। आयुं संवेल्लेन्ता गता य ण पुणो णियत्तिन्ति ॥ १ ॥ तहवि य णाम बालजणो हिंसादिषु पापकर्म्मसु प्रवर्त्तमानः प्रगल्भी-भवति धृष्टीभवतीत्यर्थः, यद्यपि च पापकर्म्माण्याचरन् परेणोच्यते–किं परलोगस्स ण बीभेसि ?, ततो भणति–‘पच्चुप्पण्णेण का-

रितं, को दट्ठुं परलोगमागते?' प्रत्युत्पन्नेनैव सौख्येन कार्यं, को हि दृष्ट्वा स्वर्गं मोक्षं वा तत्सुखं वा परलोकादायातः?, कथं वा साक्षाददृश्यमानः परलोकोऽस्तीत्यध्यवसेयः, उच्यते–'अदक्खुव दक्खु आहितं' वृत्तं ॥ १५३ ॥ न पश्यतीति अदक्खु अदक्खुणा तुल्यं अदक्खुवत्, दक्खू णाम द्रष्टा, दक्खूणा व्याहृतं दक्षुवाहितं श्रद्धस्व, हे अदक्खुदंसणो!, योऽपि कार्याकार्यानभिज्ञो सोऽपि अंध एव, न दक्खुदर्शनी, 'हन्हि हि खु निरुद्धदंसणे' हंदीति संप्रेषणे, हि पादपूरणे, दृश्यते येन तद्दर्शनं, निरुद्धं दर्शनं यस्य स भवति निरुद्धदर्शनः, तत्केन?, मोहनीयेन कर्म्मणा निरुद्धं, मिच्छादिट्ठी, एवं चारित्रनिरोधेन चरित्ते अचरित्ते वा भावना, निरुद्धं तव ज्ञानं-सन्निकृष्टं, केन ज्ञास्यसि परलोकं?, अथवा निरुद्धमिति ज्ञानं तं, न चक्षुर्दर्शनं, तत्कथं परलोकं द्रक्ष्यतीति, आत्मादीनि वाऽचाक्षुषाणि, 'दुक्खी मोहो पुणो पुणो' वृत्तं ॥ १५४ ॥ दुःखमस्यास्तीति दुःखी तैस्तैर्दुःखैः पीड्यमानः पुनः मोहमुपार्जयति, मुज्झति जेण मोहिज्जति वा स मोहः कर्म्मेत्यर्थः, संसारमनुपरीति, यतश्चैवं ततो'निव्विंदेज्ज सिलोगपूयणं' सिलोगो नाम श्लाघा यशःकामता, पूजा आहारादिभिः, दोण्णिवि णिव्विन्देज्ज–गरहेज्ज, सक्कारपुरक्कारौ न प्रार्थयेदयमर्थः,'एवं सहिते धिपासिया' एवमनेन प्रकारेण, सहितो णाम ज्ञानादिभिः, अधियं पस्सिया आयतुले पाणेहि भविज्जसित्ति, यदात्मनो नेच्छसि तत्परेषामिति, योऽपि तावत् 'गारंपिअ आवसे णरे' वृत्तं ॥ १५५ ॥ आगारत्वं, अपिशब्दार्थः सम्भावने, किमुतानगारत्वं, आवसतीत्यावसे, अनुपूर्वं नाम पूर्वं श्रवणं ततो ज्ञानविज्ञाने संयमासंयमश्च, इह तु संयमासंयमो अधिकृतः दुवालसविधं सावगधम्मं फासितो 'समया सव्वत्थ सुव्वते' समभावः समता तां समतां सव्वत्थ भावसमता, कडसामाइए हि सव्वत्थ समतां भावयति, तदनु चाकृतसामायिकः, शोभनव्रतः सुव्रतः, 'देवाणं गच्छे सलोगतां' समानलोगत सलोगतं,

विविक्तवसंभचेरदेवाणं सलोगतं, किं पुण जो महव्वयाइं फासेति ?, यतश्चैवं श्रावका अपि देवलोकं गच्छंति जिनेन्द्रवचनानुशास्ताः, तेण **'सोच्चा भगवानुशासनं'** वृत्तं ॥१५६॥ अनुशास्यते येन तदनुशासनं श्रुतज्ञानमित्यर्थः, अथवा अनुशासनस्य-श्रावकधर्मस्य फले **'सच्चे तत्थ करे उवक्कमं'** सत्ये-अवितथे सद्भ्यो वा हितं सत्यं सत्यवचनं नानृतं संयमो वा, तत्र कुर्या-दुपक्रमं, उपक्रमो नाम यथोपदेशः, अथवा सत्यमिति सत्यं, तत्थ करेज्ज उवक्कमंति, न वितथं, **'सव्वत्थ विणीतमच्छरे'** सर्वत्रेति सर्वार्थेषु येन विनीतो मत्सरः स भवति विनीतमत्सरः, मत्थरो नामाभिमानपुरस्सरो रोषः, स चतुर्द्धा भवति, तंजहा-खेत्तं पडुच्च वत्थुं पडुच्च उवधिं पडुच्च सरीरं पडुच्च, एतेसु सव्वेसु उप्पत्तिकारणेसु विनीतमत्सरेण भवितव्वं, तत्थ जातिलाभतपो-विज्ञानादिसंपन्ने च परे न मत्सरः कार्यः यथाऽयमेभिर्गुणैर्युक्तोऽहं नेति, तद्गुणसमाने च, दव्वुंछं उक्खल्लुखलगादि भावुंछं अज्ञा-तचर्या, विशुद्धं नाम उग्गममादीहि कल्पितं **'आहरे'** आदद्यात्, एवं **'सव्वं णच्चा अहिट्ठए धम्मं'** वृत्तं ॥१५७॥ सर्वं ज्ञेयं यावत् शक्तिर्विद्यते तावदध्येयं, ज्ञात्वा च अकृत्यं न कर्त्तव्यं, कृत्यमाचरितव्यमिति, उक्तं हि-“ज्ञानागमस्य हि फलं०”अधि-ट्ठए धम्मं, णाणादीणि वा, धम्मेण जस्स अत्थो स भवति धम्मट्ठी, तपोपधानवीर्यवान्,‘गुत्ते जुत्ते सदाजते’त्ति त्रिगुप्तः, जुत्तो णाम णाणादीहिं तवसंजमेसु वा सदा-नित्यकालं जतेत यत्नवात् स्यात्, कुत्र यतेत ?, तदिदमात्मपरे, आत्मनि परे च आत-परे, णो अत्ताणं अतिवातेज्ज णो परं अतिवातेज्जिति, आत्मनः परं आत्मेसु वा परं, किं तं ?, आयतार्थिकत्वं, अत्थो णाम णा-णादि, आयतो णाम दृढग्राहः, आयतविहारकमित्यर्थः, **'वित्तं पसवो य णातयो'** वृत्तं ॥ १५८ ॥ वित्तं-हिरण्णादि पसवो-गोमहिसाजाविगादि णातयो-मातापितासंबंधिणो, बालजणो सरणंति मण्णती, एतान् बालजनः शरणं मन्यते, एते हि मां दुःखा-

श्रीसूत्रकृ-ताङ्गचूर्णिः ॥ ९६ ॥

त्परित्रास्यंति इह परत्र च, तं च न भवति, कथं ?, इह तावत्–सयणस्सवि मज्झगतो रोगाभिहओ किलिस्सए एगो। सयणोवि य से रोगं ण विरिंचिति णेव णासेति ॥१॥ सव्वणयहेतुसिद्धं अप्पाणं जाण णिच्छएणेकं' यथा ते मम न त्राणाय तथाऽहमपि न तेषां त्राणाय शरणं च, इतश्च न भवति शरणं, यतः 'अब्भागमियंसि वा दुहे' वृत्तं ॥ १५९ ॥ अभिमुखं आगामिकं अभ्यागमिगं–व्याधिविकारः, स तु धातुक्षोभादागंतुको वा, उपक्रमाज्जातमित्युपक्रमिकं, अनानुपूर्व्या इत्यर्थः, निरुपक्रमायुः करणं, भवंतो नाम भवान्ते मरणमेव, का भावना ?, तद्धि यद्बालमरणं न भवति, जराक्रामाद्युपक्रमतो वा फलप्रपातवत्, तस्यैवंविधमृतस्य 'एगस्स गती च आगती' एकस्येति पशुज्ञातिहीनस्य, एवं विदुः मत्वा न तां वित्तपशुनातिं च शरणं मन्यते,'सव्वे सयकम्मकप्पिया' वृत्तं ॥ १६० ॥ सर्वे इत्यपरिशेषाः, स्वैः कर्मभिः कल्पिताः प्रविभक्तविशेषा इत्यर्थः, तद्यथा-पृथिविकायिकत्वेन०, कृती च्छेदने, न विकृतं अच्छिन्नमित्यर्थः, अवियत्तेन वा अधिगच्छंतेनेत्यर्थः,'दुहिणे'त्ति दुःखिनः प्राणिनो जीवा 'हिंडंति भयाकुला सढा' भयैः आकुला भयाकुला, भयानि सप्त, भयानि वा दुःखं, तेणाकुलाः, सढा नाम तपश्चरणे निरुद्यमाः शठीभूता वा, पापकर्मभिः ओतप्रोता इत्यर्थः,'वाहिजरामरणेहि भिदुता'नारकतिर्यग्मनुष्येषु व्याधिः जरा तिर्यङ्मनुष्येषु मरणं चतसृष्वपि गतिषु, 'इणमो खणं वियाणिया'वृत्तं ॥ १६१ ॥ 'इणमो'त्ति इदं क्षीयत इति क्षणः, सतु सम्मत्तसामाइयादिचतुर्विधस्यापि, एक्केक्कः स चतुर्विधो खणो भवति, तंजहा–खेत्तखणो कालखणो कम्मखणो रिक्खखणो, एते चत्तारिवि जहा लोगविजए पढमे उद्देसए 'खणं जाणाहि पंडिए'त्ति सुत्ते भणिता तथा भणितव्वा, विविधं जाणिया विजाणिया,'णो सुलभं बोधी य आहितं' बोधी णाणाति तिविधो आहितमारव्यातं,उक्तं च-"लद्धेल्लियं व बोधिं अकरेंतोऽणागयं च पत्थंतो। अण्णं दाइं बोधिं लब्भिसि कयरेण मोल्लेणं ?॥१॥"

अत्राणादि ॥ ९६ ॥

विराहितसामण्णस्स हि दुल्लभा बोधी भवति, अवडुं पोग्गलपरियट्टं उक्कोसेणं हिंडति, 'एवं सहितेहि पस्सिया' एवं मत्वेति वाक्यशेषः, णाणातीसहितो अधिया(वा)सए परीसहे, पठ्यते च 'एवं सहिते अधिया(वा)सए' अधिया वासए अधिवासए, यदुक्तमेवमेतत्, क एवमाह-'आह जिणे इणमेव सेसगा' रिसभसामी भगवं अट्ठावए पुत्तसंबोहणत्थं एवमाह इदमेव, जे वाऽजिताद्याः शेषका जिनाः ते प्राहुः, किमतिक्रान्ता अनागताश्चैवं जिनाः कथितवन्तः कथयिष्यंति च ?, ओमित्युच्यते 'अभविंसु पुरापि भिक्खवो' वृत्तं ॥ १६२ ॥ अभविष्यन्नतिक्रान्ताः भिक्षव इति आमन्त्रणं, 'आएसावि भविंसु सुव्वता' आदेशा इति आगमेस्सा 'एताइं गुणाइं आहिते' एते ये उक्ता इहाध्ययने अप्रमादादिगुणा सिद्धिगमणसफला काश्यपो उसभस्वामी वद्धमाणस्वामी वा अनुगतो अनुकूलो वा अनुलोमो वा अनुरूपो वा धर्म्मः अनुधर्म्मः काश्यपस्यानुचरणशीलाः, द्विधा समासः क्रियते-कासवो जं अणुधम्मं चरति जो वा कासवस्स अणुधम्मं चरंति ते च गुणा उक्ताः, पुणरपि चोच्यन्ते-'तिविधेणवि पाण मा हणा' वृत्तं ॥ १६२ ॥ त्रिविधेन योगत्रयकरणत्रयेण, प्राणाः आयुःबलेन्द्रियाः प्राणाः ते मा हण आत्मनोऽहितं, अणिदाणो ण दिव्वमाणुस्सएसु कामभोगेषु आसंसापयोगं करेति, इंद्रियणोइन्द्रिएसु संवुडो, 'एवं सिद्धा अणंतगा' एतं मग्गं अणुपालित्ता अतीतकाले अणंता सिद्धा, संपतं संखेज्जा सिज्झंति, अणागते अणंता सिज्झिस्संति, अवरे नाम ये वर्त्तमाना आगमिष्याश्चेति, 'एवं से उआहु अणुत्तरणाणी अणुत्तरदंसी ॥ १६४ ॥ एवमवधारणे 'स' इति सो उसभसामी अट्ठाणउतीए सुताणं 'आह' कथितवान्, अणुत्तरणाणी अणुत्तरदंसी अणुत्तरणाणदंसणधरो, एतेण एकत्वं णाणदंसणाणं ख्यापितं भवति, 'अरहा णायपुत्ते' पूजादीनर्हतीत्यर्हन् नास्य रहस्यं विद्यते वा अरहा ज्ञातस्य पुत्रः, णातकुलपसूते सिद्धत्थखत्तियसुते भगवान्-ऐश्वर्यादियुक्तः, 'वैसाली-

श्रीसूत्रकृताङ्गचूर्णिः उप० १ ॥ ९८ ॥

ए'त्ति गुणा अस्य विशाला इति वैशालीयः, विशालं शासनं वा इक्ष्वाकुवंशे भवो वैशालीयः, 'विशाला जननी यस्य, विशालं कुलमेव वा। विशालं [प्र]वचनं चास्य, तेन वैशालिको जिनः ॥१॥ 'वियाहितो' व्याख्यातः, इति-एवं जंबूस्वामिनः वृद्धभगवानार्यसुधर्मा कथयति-एवं से उदाहु जाव वियाहितो, 'इति:' परिसमाप्तौ, अथवा एवमर्थः, एवं इति वेमि, सुधम्मसामिस्स वयणमिदं, भगवता सर्वविदा उवदिट्ठं अहमवि वेमि, नयाः पूर्ववत् ॥ इति वैतालीयाख्यं द्वितीयमध्ययनं समाप्तं ॥

इदाणीं उवसग्गपरिण्णत्ति अज्झयणं, तस्सवि चत्तारि अणुयोगदारा परूवेयव्वा, अधियारो दुविधो-अज्झयणत्थाहियारो उद्देसत्थाधियारो य,अज्झयणत्थाधियारो सव्वे उवसग्गा जाणित्ता सम्मं अधियासेतव्वा,उद्देसत्थाधियारो'पढमंमि य पडिलोमा०' गाथा ॥ ४९ ॥ पढमे उद्देसए पडिलोमा जहा पुट्ठे दंसमसएहिं तणफासमचइता आयपरतदुभयसमत्था उवसग्गा भण्णंति, बितिए तु मायादि अणुलोमा उवसग्गा अण्णे य रायमादी पाएण अणुलोमे उवसग्गे उप्पायंति, ततिए उद्देसए अज्झत्थविसेसोवदंसणं भण्णिहिति, के जाणंति विउवातं? इत्थीओ उदयाओ वा, परवादी वयणं संबुद्धा समकप्पाओ अण्णमण्णेहि मुच्छिता परसमयिका परतित्थियभाविता य उवसग्गा उप्पाएन्ति, 'हेउसरिसेहिं' गाथा ॥५०॥ चउत्थुद्देसए हेतुसरिसा अहेतू भण्णिहिति, जहा मंथवई णाम सीलक्खलितकुतित्थिया एवं परूविन्ति हेत्वाभासादि, अहेतवो भूत्वा हेतुमिवात्मानमाभासयंति हेत्वाभासस्स 'समयपडितेहिं' ससमयजोगेहिं, जो तेसिं समया जुज्जमाणया णिउणा भणिता, अथ आयरिओ ससमयपडितेहिं णिउणेहिं दिट्ठंतेहिं तेसिं सीलखलियताणं अण्णउत्थियाणं पण्णवणं करेति चउत्थे, एवं दुविधोऽवि अत्थाहियारो भणितो। इदाणिं णामणिप्फण्णो णिक्खेवो. तत्थ गाथा 'उवसग्गंमि य छक्कं०' गाथा ॥ ४५॥ णामठवणाओ तहेव, वइरित्तो दव्वोवसग्गो दुविधो-चेतनदव्वोवसग्गो य

उद्देशार्थाधिकारः

॥ ९८ ॥

अस्य पृष्ठे तृतिय् अध्ययनस्य आरभ्यते

अचेतनदव्वोवसग्गो चेतनदव्विगं जं तिरक्खमणुआ णियगसरीरावयवेण आहणंति, अचेतणदव्विगं तं चेव लउडादीहिं, अथवा अभिघातो तडिमादि उवरिं पडति, अथवा उवसग्गो दुविधो–आगंतुगो पीलाकरो य, आगंतुगो चउप्पदलउडादीहि, वातियपेत्तियादि, खेत्तोवसग्गो 'जं खेत्तं बहु ओघभवं' गाथा ॥४६॥ ओघो बहुगं उप्पण्णं बहूपसग्गो, जहा बहुउवसग्गो लाढाविसयो, जहिं भट्टारगो पविट्ठो आसि छउमत्थकाले सुणगादीहि तत्थ णिद्धम्मा खवेंति, ओहभयं भवति जहा भरहवासे, कालोवसग्गो एगंतदूसमा, सीतकाले वा सीतपरीसहो वा णिदाघउसिसिणकाले उणपरीसहो वा,एवमादि कालोवसग्गो भवति, भावोवसग्गो कम्मोदयो, सो पुण दुविधो–ओहतो उवक्कमतो वा, ओहतो जहा णाणावरणं दंसणमोहणीयं असुभणामं णियागोत्तं अन्तरायिकं कम्मोदयितं, उवक्कमियं जं वेदणिज्जं कम्मं उदिज्जति। 'दंडकससत्थरज्जू' गाथा 'उवक्कमिए संजमविग्घकारए०' गाथा ॥४७॥ जे संजमा उवक्कामेन्ति उवसग्गा तेहिं अहिगारो, जेण वा दव्वेहि वा तं कम्मं उदीरिज्जति, जेण संजमाओ उवक्कमाविज्जति तेणवि अधियारो, ते चउव्विधा-दिव्वा तिरिक्खजोणिया माणुस्सा आयसंवेतणिया, दिव्वा चउव्विधा–हासा पदोसा वीमंसा पुढोवेमाता, मणुस्सावि चउव्विधा–हासा पदोसा वीमंसा कुसीलपडिसेवणता, तिरिया चउव्विधा–भया पदोसा आहारा अवच्चलेणसारक्खणता, आयसंवेतनीया चउव्विधा–घट्टणता लेसणता थंभणता पवडणता, अथवा वातिता पेत्तिया संभिया सन्निवाइया, एवं 'एक्केक्को चउविहो०' गाथा ॥४८॥ अट्ठविहो कहं होति ?, एक्केको अणुलोमो पडिलोमो य, अथवा सव्वेऽवि सोलसविधा उवसग्गा, चत्तारि चउक्कगा सोलस भवंति, एवं उवसग्गा जाणितव्वा जाणणापरिण्णाए, पच्चक्खाणपरिण्णाए अधिआसेतव्वा, परिहरंतेण तहा तहा घडितव्वं परक्कमियव्वं जहा परीसहा णिज्जेज्जंति। गतो णामणिप्फण्णो। सुत्ताणुगमे सुत्तमुच्चारेयव्वं,'सूरं

अस्य पृष्ठे तृतिय् अध्ययनस्य प्रथम उद्देशक: आरभ्यते

मण्णति अप्पाणं०'सिलोगो ॥१६५॥ कश्चित्संग्रामे उपस्थितो स्वाभिप्रायेण सूरमित्यात्मानं मन्यमानो वाग्भिर्विस्फूर्जन्नुपतिष्ठति जाव जेयं ण पस्सति, जियति जिनाति वा, गर्जते कलभस्तावद्, घनमाश्रित्य निर्भयः। गुहान्तरविनिष्क्रान्तं, यावद्दिंसहं न पश्यति ॥१॥ तावद्गजः प्रश्रुतदानगंडः, करोत्यकालांबुदगर्जितानि। यावन्न सिंहस्य गुहास्थलीषु, लाङ्गूलविस्फोटरवं शृणोति ॥२॥ णिद्दरिसणं 'जुज्झंतं दढं धनुर्यस्य स भवति दढधन्वा तं 'सिसुपालो व महारधं' मधारथो–केसवो शिशुपालेन तुल्यं शिशुपालवत्, स किल माद्रीसुतः चतुर्भुजो जातः, भीतया पश्चात् तया नैमत्ती पृष्टः–किमिदं रूवं ?, तेनापदिश्यते–महाद्भुतमेतत्, यं दृष्ट्वाऽस्य एतौ द्वौ भुजौ स्वाभाविकौ भविष्यतः ततोऽस्य मृत्युरिति, ततः सा माद्री दारकजन्मवर्द्धापकानामागतानां तं दारकं दर्शयति स्म, यथाहं च पादेष्वपातयत्, वासुदेवस्य चागतस्य तमालोक्य तौ भुजौ नष्टौ, पश्चात्तस्य मात्रा वासुदेवोऽभयं याचितः, तेनापदिश्यते–अपराधशतमस्य क्षमयिष्यामि, ततोऽसौ प्रवृद्धं वासुदेवं समक्षं परोक्षं वा गोपालवत्सपालादिभिराक्रोशैराक्रुष्टवान्, आज्ञाप्रतिषेधादीश्चापराधान् कृतवान्, ततोऽपराधशते पूर्णे क्वचिदेव अभिमुखमापतंतं आक्रोशंतं मत्पथोऽसर्प्पस्व इति, नाहमपथा गच्छामि, अल्पेनैवायासेन चक्रधुक् सुदर्शनं चक्रधारातिपातेन शिरश्छिन्नं कृतवानिति परोक्षो दृष्टान्तः, अयं तु प्रत्यक्षः 'पयाता सूरा रणसीसे०' वृत्तं ॥ १६६ ॥ भृशं याताः प्रयाताः, शयति शय्यते वा शूरः, महत उक्किट्ठिसीहणातबोलकलकलसद्देणं प्रयाताः, रणसीसं णाम अग्गाणीकं, समस्तं ग्रास्यते ग्रस्यन्ते वा तस्मिन्निति संग्रामः, उपस्थितो णाम अन्योऽन्यबलेषु संग्रामायोपस्थितेषु, माता पुत्तं ण याणाति, अमातापुत्री यदा संग्रामो भवति, का भावना ?, तस्यामवस्थायां माता पुत्रं मुक्तं उत्तानशयं क्षीरहारमजंगमं भयोद्भ्रान्तलोचना अच्चादण्णा ण याणाति–नापेक्षते, न त्राणायोद्यमते, हस्तात्कटीतो वा भ्रस्यमानं भ्रष्टं वा

वा न जानीते ‘जेतेण परिविच्छिते’ जयतीति जेता अतस्तेन जेत्रा, तेण जयएण, परि सव्वतो भावे समंता वाणादिभिरायुधैस्तैः कृतः परिविच्छिते, सव्वतो छिण्णमित्यर्थः,‘एवं सेहेवि अप्पुट्ठे’ सिलोगो ॥१६७॥ अपुट्ठो णाम अप्पुट्ठधम्मो, अस्पृष्टो वा परीषहैः, अदृष्टधर्मा इत्यर्थः, भिक्खूणं चरिया भिक्खुचरिया, कोविदो विपश्चित् न कोविदो अकोविदो, न तावत्परिषहोपसर्गैः विकोविदः, सो पव्वयंतो चिंतेइ भणति य–किं पव्वज्जाए दुक्करं काउंति ?, किं णिच्छियस्स दुक्करं ?, णणु सीहवग्घेहिंवि समं जुज्झिज्जति, संगामे य पविसिज्जति, अग्गिपडणं च कीरइ, एवं अदिट्ठपरीसहो सूरं मण्णति अप्पाणं तपःशूरं, जहा दव्वसंगामे कुंतासिबाणगहणेसु, युद्धे उवट्ठिते केइ परबलसद्दं सोऊण चेव णस्संति, केइ पवृत्ते प्रहताः अप्रहता वा, केइ मारिज्जंति, एवं भावसंग्रामेऽवि सूर मण्णति अप्पाणं जाव लूहं ण सेवएत्ति, रूक्षः–संजम एव, रूक्षत्वात् तत्र कर्म्माणि न श्लिष्यंति, रूक्षपटे रजोवत्, तत्र केचित् दृष्ट्वैव साधून् जल्लादीहिं लिप्ताङ्गान् केचिदर्द्धकृते लोचे केचित्परिसमाप्ते केशान् उत्स्रष्टुं गतास्तत एव यांति, उक्ता ओघउपसर्गाः। इदाणिं विभागशः उपदिश्यन्ते, तत्थोवसग्गा परीसहा य एगं चेव काउं उवदिस्संति ‘जदा हेमंतमासम्मि’ सिलोगो ॥ १६८ ॥ यत्रातीव शीतं भवति वर्षवर्द्दलादयो वा तीव्रवाता भवंति, वातग्रहणात् सीयवग्घविरालोपाख्यानं, यथा पोसे वा माहे वा ‘तत्थ मंदा विसीदंति’ तस्मिन् काले तत्र मंदा उक्ताः, विविधं सीदंति विसीदंति, अहो इमा सुदुक्करा पव्वज्जा, बहवो परीसहोवसग्गा विसहितव्वा, ते एवं चिंतेंता सीयाभिभूया ‘रट्ठहीणा व खत्तिया’ जहा परबलेण उच्छादिते रट्ठे हितसारे य परबलक्कंते विलुप्यमाने वा, खत्तिओ णाम राया, सो जहा सोयति, एवं सेहोऽवि णिरग्गिगे रण्णे गुत्तावगुत्तावसधीसु सीताभिहुतो विचिंतेति–किमेवंविधाए पव्वज्जाए गहियाए ?, भणितो सीतपरीसहो, एष एवोपसर्गः, तत्पुरुषोऽयं

समासः। तदिदाणीं उण्हपरीसहोऽपदिस्सति 'पुट्ठो गिम्हाभितावेणं' सिलोगो ॥ १६९ ॥ अभिमुखं तापयतीति अभितापः, अशोभनमनाः विमनाः कर्पूरवासितोदगं कंधरावरादि वा चिंतेंतो, अथवा तपं प्रति विगतं मनोऽस्य स भवति विगतमनाः, पातुमिच्छा पिपासा, सुट्ठु पिवासितो 'मच्छा अप्पोदए जहा' तदल्पत्वादतीव तप्यन्ते बहिरुदकतापेन अंतश्च मनस्तापेन तप्यमानाः यथा सीदन्ति एवमसावपि जलमलस्वेदक्लिन्नगात्रो बहिरुष्णाभितप्तः शीतलान् जलाश्रयाद्यान् धारागृहाणि चन्दनादीश्चोष्णप्रतीकारान् अनुस्मरन् भृशं अनुशोचते व्याकुलचेता भवति, वुत्तो उण्हपरीसहो। इदाणिं जातणापरीसहो–'सदा दत्तेसणा दुक्खं' सिलोगो ॥ १७० ॥ सदेति सव्वकालमविश्रामेन दत्तग्रहणात् जातितं दत्तं च, जाइयदत्तमप्येसणीयं च, दुक्खं खुधातिसाभिभूतेहिं तं परिहरितुं, दुक्खं च पडिसेहिज्जति अणेसणिज्जं, साम्प्रतसुखाभिलाषी पडुप्पण्णभारिओ जीवो दिंतगा य रूस्संति 'जायणा दुप्पणोल्लिया' दुःखं प्रणुद्यते जायणा बलदेववत्, वत्तारो य भवंति–कम्मत्ता दुब्भगा चेव०कृषीपशुपाल्यादिभिः कर्म्मान्तैरार्त्ता अभिभूता इत्यर्थः, स्त्रीमित्रज्ञातिस्वामिनां दुब्भगा इति, आहुः पृथक् पृथक् जनो विस्तरा वा जनाः पृथग्जनाः, 'एते सद्दे अचाअंता' सिलोगो ॥१७१॥ शब्द्यते अनेनेति शब्दः, अचाएंता णाम अशक्नुवन्तः सोढुं, क्वोदीर्यन्ते ?, उच्यते, 'गामेसु नगरेसु व।' वा खेडभिकल्पे कब्बडादीसुवि, 'तत्थ मंदा विसीदंति संगामंमि व भीरुणो' भीरुवो हि संग्रामे प्राप्ते मरणभयाद्विषीदंति, ऊरू खंभाइज्जंति, खिन्नचित्ता भवंति, 'अप्पेगे खुज्झि(ब्भिते)भिक्खू' सिलोगो ॥१७२॥ अपि एके, न सव्वे, खुज्झितो णाम क्षुधितः पिपासुर्वा, तं क्षुत्तृष्णाप्रतियोगार्थमटंतं 'सुणी दंसती'ति सुणी लूषयतीति लूषकः भक्षक इत्यर्थः, 'तत्थ मंदा विसीदंति' संयमोद्यमं प्रति सीदंति, दिट्ठंतो 'तेऊपुट्ठा व पाणिणो' तेजोनाम अग्निस्तेन दवाग्निना

अन्यतमेन वा तेजसा शशमूषकमार्जारकोलवृकक्षुपकलतावितानवृक्षादयो दह्यमानाः संकुचंति, प्राणिनोऽपि दह्यमाना विसीदंति। 'अप्पेगे पडिभासंति' सिलोगो ॥१७३॥ समन्ताद्भाप्यन्ते परिभाषन्ते, पथ्यतेऽनेनेति पंथाः पन्थानं प्रति योऽन्यः पन्थाः स प्रतिपथः प्रतिपन्था वा तेन गच्छतीति प्रातिपथिकः तं, गामानुगामं रीयंतं केइ पाडिपंथगाः पडिभासंति, अथवा यो यस्य विलोमकः स तस्य प्रातिपथिको भवति, ते, न तु सर्वे एव, कुतीर्था-सन्मार्गविलोपकाः, कथं ?, अणुसोयपट्ठिए बहुजणंमि, साधवो हि प्रतिश्रोतसा मोक्षमभि प्रस्थिताः, कुतीर्थास्त्वनुश्रोतसा, किं भापंते-'पडियारगया एते' करणं कृतिर्वा कारः कारं प्रति योऽन्यः कारः प्रतिकारस्तं गताः पंडियारगताः, पडियाइं कम्माइं वेदंति, एते हि अण्णाए जातीए पंथा उच्छूढा तेण णिइणा हिंडति, ण य दत्ताइं दाणाइं तेन न लभंति, लद्धेऽपि य ण गेण्हंति, ण चोदगाणि दत्ताणि तेण ताणि ण पिबंति, 'जे एते एव जीविणो'त्ति जे एतेवं जीवणसीला, तंजहा कंजिगउसिणोदगादीहिं अन्ताहारेण जीवंति, पठ्यते च-'तद्दारवेयणिज्जे ते' जेहि चेव दारेहिं कितं तेहिं चेव वेदिज्जतित्ति तद्दारवेदणिज्जं, जहा अदत्तदाणा तेण ण लभंति, सेसं तहेव। 'अप्पेगे वइं जुंजन्ति' ॥ १७४ ॥ अप्येके, न सर्वे, वाचं जुञ्जंति वाचमुदीरयन्तीत्यर्थः, अहो एते 'चरगा पिंडोलगा' पिंडेसु दीयमानेसु उल्लेति पिंडोलगा, अधमजातयः ब्राह्मणा उत्तमाः क्षत्रियाः वैशा मध्यमाः शूद्रा अधमाः, ब्राह्मणस्य किल भिक्षा इष्टा क्षत्रिये कृपी, अवशेषास्तु अवलगन्ति-क्लेशं कुर्वन्ति तेन तत् पिण्डोलगाः, मुण्डेत्यशिष्टाः, स्वेदमलमत्कुणादिभिः खाद्यमाना अङ्गुलीनखशुक्तिशलाकादीनां कण्डुइतमंगैः विणट्ठंगा 'उवज्जलंति' उवचितजल्ला मलसकटाच्छादिताङ्गत्वात्, उज्जायंति वा, पठ्यते च-उज्जाओ मृगो, नष्ट इत्यर्थः, उज्जातमृगसमाः 'असमाहितं'ति अशोभना विवृताङ्गत्वात् अथवा असमाहिता-दुःखिता 'एवं विप्पडिवण्णेगे०' ॥ १७५ ॥

श्रीसूत्रकृताङ्गचूर्णिः ॥१०४॥

सिलोगो, एवमनेनप्रकारेण न सम्यक् प्रतिपन्नाः विप्रतिपन्ना एगे मिथ्यादृष्टयः, स्वयमजानकाः न च ज्ञानवतां शृण्वन्ति, अज्ञानं हि तमो, ते ततो अण्णाणतमातो तमन्तरं वा याइ, उक्कोसकट्ठितीयं मोहणिज्जं कम्मं बंधंति, एवं णाणावरणिज्जं दंसणावरणिज्जं, एगिंदियाइयाइसु वा एगंततमासु जोणीसु उववज्जंति, णिच्चंधकारेसु वा णरएसु, बुद्धीए मंदा मोहो–अण्णाणं पाउता–छण्णा, अथवा मतिमंदा इत्थिगाओ य, मंदविण्णाओ स्त्रीमोहेण, उक्काः शब्दाः। इदाणिं फासा ‘पुट्ठो य दंसमसएहिं’ सिलोगो ॥१७६॥ सिंधुतामलित्तिगादिसु विसएसु अतीव दंसगा भवंति, अप्रावृतास्तैः भृशं बाध्यमानाः शीतेन च अत्थरणपाउरणट्ठताए तणाइं सेवमाणा तेहिं विज्झंति, अचाइया अधियासितुमिति वाक्यशेषः, इदं च दुःखमधिसह्यते यदि नाम परः लोकः स्यात्, स च ‘न मे दिट्ठे परे लोए, किं परं मरणं सिया’ न हि मयाऽन्येन वा साक्षात्परलोको दृष्टः यन्निमित्तं क्लेशः सह्यते, क्लेशान् सहमानस्य हि परं मरणं सिया, तदप्यनिष्टं, मरणमिहेच्छेत् यद्यसौ परलोकः स्यादिति, संदिग्धे तु परलोके किं दुःखेन तपसा कृतेनेत्ययमदर्शनपरीषहोपसर्गः, किंच ‘संतत्ता केसलोएणं’ सिलोगो ॥१७८॥ समस्तं तप्ताः क्लिश्यन्त एभिराकृष्टा इति क्लेशाः, दुःखभीरवो हि क्वचित् केसलोयपराजिता विप्पडिवज्जंति तेषां स एवोपसर्गः, ‘बंभचेरं’ इत्थिपरीसहो तेण पराइता–उवसग्गिता अणुवसग्गिता वा ‘तत्थ मंदा विसीदंति मच्छा पविट्ठा व केयणे’ केयणं णाम कडवल्लसंठितं, मच्छा पाणिए पडिणियत्ते उत्तारिज्जंति इत्यर्थः, खुड्डमादी, तत्थ ते पविट्ठा वरागा सोयंति विसीदंति–परिघोलंति जया व पाणियं णिघुलितं।‘आयदंडसमायारा’ सिलोगो ॥१७८॥ आत्मानं दंडयितुं शीलं येषां ते भवंति आत्मदंडसमाचाराः, मिच्छत्तसंठिता भावणा जेसिं ते भवंति मिच्छासंठितभावणा, ते तु कथमात्मानं दंडयंति ?, उच्यते, ते साधून् दृष्ट्वा हर्षात्प्रदोषाद्वाऽपि पिट्ठेति जहा सो पुरोहितपुत्रः, केयिचि

तमोऽन्तरादि

॥१०४॥

श्रीसूत्रकृताङ्गचूर्णिः ॥१०५॥

ण सव्वे, लूयति अक्कोसंति पिट्टेंति य अनार्या दसणादीहिं। 'अप्पेगे पलियंतंमि' सिलोगो ॥१७९॥ वा अपि एके, न सर्वे, 'पडियंतं' समंतादंतं परियन्तं, कस्य ?, देशस्य, तस्मिन् २ देशपर्यन्ते केचिद्भापंते–चारिकोऽयं चारयतीति चारकः, येषां परस्परविरोधः ते चारिकमित्येनं संवदंते, चोर वा, तं 'सुबधंपि' संगतं–शोभनं व्रतं. संकिता वा णिस्संकिया वा भूत्वा बंधन्ति भिक्षुयं बालाः, जहा गोसालो बद्धो आसीत्, 'कसायवसणेहि य'त्ति तत्पुरुषः ममामः द्वन्द्वो वाऽयं, समावत एव केचित्साधून् दृष्ट्वा कसाइज्जंति, वसणं केसिंचि भवति, कप्पडिगा पासंडिया वा होंति, णच्चावेंति वा, तेष्वेव पर्यन्तेषु मध्यदेशेषु वा कंचि रियमानं कश्चिद्बालो 'तत्थ दंडेण संवीते' सिलोगो ॥१८०॥ दंडो णाम खीलो दंडप्पहारो वा, मुट्ठी मुट्ठीरेव, फलं–चवेडाप्रहारः संवीतः–संप्रहत इत्यर्थः, 'णातीणं सरती बालो' जइ णाम णातयो केयि एत्थ होत्था भातिमित्तादयो णाहमेवंविधां आवत्तिं पावेंतो 'इत्थी वा कुद्धगामिणी' जधा सा अचंकारितभट्टा, कुद्धा गच्छतीति कुद्धगामिणी जहा सा 'एते भो फरुसा फासा' सिलोगो ॥१८१॥ फरुसा नाम स्नेहवियुक्तैरुदीरिता, दुक्खं अधियासिज्जंति दुरधियासगा अप्पसत्तेहिं, ते अणधियासेमाणा हत्थी वा सरसंवीतः शस्त्रप्रहारैरित्यर्थः, यथा रौद्रसङ्ग्रामे हस्तिनः शरसंवीता नश्यन्ति, एवं भावसंग्रामादपि परीसहपराजिता क्लीवा, 'वराका' नाम परीषहे वराकाः पुनरपि गृहं गच्छंति गमिष्यंति च, पठ्यते च 'तिव्वसढगा गता गिहं'ति वेमि, तीव्रं शढाः तीव्रशढा तीव्रैर्वा शढाः तीव्रशढाः, तीव्रैः परीषहैः प्रतिहता ॥ इति तृतीयस्योपसर्गाध्ययनस्य उद्देशः प्रथमः॥३–१॥

म एव उपसर्गाधियारो अणुवत्तत एव, 'अथेमे सुहुमा संगा' सिलोगो ॥ १८२ ॥ 'अथे'त्यानन्तर्ये पडिलोमोवसग्गा गता, इदाणिं अणुलोमा. उक्तं हि–पढमम्मि य पडिलोमा णाती अणुलोमगा बितीयंमि'। सुहुमा णाम निउणा, न प्राणव्यपरो-

पर्यन्तोपद्रवाः

॥१०५॥

अस्य पृष्ठे तृतिय् अध्ययनस्य द्वितिय उद्देशक: आरभ्यते

पणवत् स्थूरमूर्त्तयः, उपायेन धर्माच्यावयंति, उक्तं हि–शक्यं जीवितविघ्नकरैरप्युपसर्गैरुदीर्णैः माध्यस्थ्यं भावयितुं, अणुलोमा पुण पूजासकारादयः भिक्खूणं दुरुत्तरा भवंति, वक्ष्यति हि 'पातालवदुरुत्तरा' सज्जते यत्र स सङ्गः, संगोत्ति वा विग्घोत्ति वा वक्खोडित्ति वा एगट्ठा, अल्पसत्त्वानां दुस्तरा, नतु सत्त्ववतां,'जत्थ मंदा विसीदंति' मंदा उक्ता, विसेसेण सीयंति च, चएत्ता णाम असकिंता जवइत्तएत्ति वा लाढित्तएत्ति वा एगट्ठा, 'अप्पेगे णातयो दिस्स'सिलोगो ॥१८३॥ अपिः पदार्थसंभावने, एके, न सर्वे, ज्ञातयो–मातापित्रादि पव्वयंतं पुव्वपव्वइतं वा दट्ठूण रुयंति, किध ?, कवणकरुणाणि,'नाधपियकंतसामिय०' परिवारिया दव्वतो भावतो य, वयं वुड्ढा कर्मासहिष्णवः तदिदानीं पोसाहि णे, आबाल्यात् पुट्ठो मदादिभिः,'पिता ते थेरओ तात !'सिलोगो ॥१८४॥ तात ! इत्यामन्त्रणं, उक्तं हि–"पिता ते स्थविरो तात !, वयं च गतयौवनाः। न च तत्कर्म जानामि, यज्ञानात्यपरो जनः ॥१॥" त्वां हि मुक्त्वा(गतः)अस्यां दशायां कोऽन्यः पोषयिष्यति ?, तं तु सद्भावतो ब्रूते कौतुकाद्वा, अन्येष्वपि पुत्रेषु विद्यमानेषु ब्रवीति–पोस णे तात ! पुट्ठो सि, कस्स णाम तुमं अम्हे अणाहाइं परिचयसि, किंच–कश्चिद् जनैः सुहृद्भिर्वा निष्काममेवमुपदिश्यते–'पिता ते थेरतो तात !' थेरगो दंडधरितग्गहत्थो अत्यन्तदशां प्राप्तः, युक्तं त्वयि जीवमाने मल्लपिंडमडंतो ?, कथं च तव धर्मः स्यात् अस्मिन्विलवमाने ?, स्वसा नाम ते भगिनी, सा य खुड्डिया भद्दं, बृहत्तमा कन्या वा, कोऽस्या निर्वहणं करिष्यति ?, एवमादीणि कार्यसहस्राणि संताणि असंताणि वा उदीरंति,'भायरो ते सगा तात !' श्रण्वंतीति श्रवा–आणाउववायवयणणिद्देसे य चिट्ठंति, समानोदराः सोदराः, सोदरग्रहणात् अन्येऽपि ताव एकपित्रादयो छड्डिज्जंति सुहं, न तु सोदराः। 'मातरं पितरं' सिलोगो ॥ १८५ ॥ मातापितरौ हि सुश्रूषार्हावेताविदानीं पुण्णाहि, एवं लोको भविष्यतीत्ययं परश्च, अस्मिँस्तावद्यशः कीर्त्तिश्च

श्रीसूत्रकृताङ्गचूर्णिः ॥१०७॥

भवति मङ्गलं च, उक्तं हि–‘गुरवो यत्र पूज्यन्ते, यत्र धान्यं सुसंभृतम्। अदन्तकलहो यत्र, तत्र शक्र ! वसाम्यहम् ॥ १॥’ परलोकश्च भवति गुरुशुश्रूषया, एते हि पदीवत्थिया समणगा भवंति जे मायापितरं सुसुस्संति, तेण तेसिं गुरुपडिणियाणं कतो लोगो धम्मो वा भविस्सति? ॥ किं चान्यत्–‘उत्तरा सुहुरुल्लावा’सिलोगो ॥१८६॥ उत्तरा नाम प्रतिवर्षमुत्तरोत्तरजातकाः समघटच्छिन्नगाः, पठ्यते ‘इतरा मधुरोल्लावा’ इतरा णाम खुड्डुल्लगा अव्यक्तमधुरोल्लावकाः ‘पुत्ता ते तात ! खुड्डुगा’ तात इत्यामंत्रणं, खुड्डुगत्ति अप्राप्तवयसः अकर्मयोग्या वा ‘भारिया ते णवा तात !’ भरणीया भार्या, नवा नाम नववधूः अप्रसूता गर्भिणी वा, मा सा अण्णं जणं गमेज्ज, उब्भामए वा करेज्ज, जीवंतए तुमंमि अण्णं पतिं गेण्हेज्जा, ततो तुज्झ अद्धीतीया भविस्सति, अम्हवि य जणे छायाघातो अवण्णओ जणे भविस्सतीति, किंच–जो जहा पुव्वमासी तस्स हि म एव उवमग्गो पायो भवति, येनान्यथा ब्रवीति, तद्यथा–यः कृष्यादिकर्म्मपराजितः तं दृष्ट्वा ब्रुवते ‘एहि ताव घरं जामो’ सिलोगो ॥ १८७ ॥ जाणामो जहा तुमं अतिकम्मा भीतो पव्वइतो, इदाणिं वयं कम्मसमत्था, कम्मसहायगा य कम्मसमत्था, कम्मसहायगा य कम्मसहायकत्वं प्रति भवतः, तदिदानीं कुमारः प्रति भण्णइ–ण चंप गोणिवि, हत्थेण मा छिवा, णित्तेण वा उक्खिवाहित्ति, दूरगतं च णं दट्ठूण भणति–आसण्णं वा गृहमागच्छ,‘वितियंपि तात! पासामो जामो ताव सयं गिहं’ वितियंपि तात! पासामो स्वे गृहे तिष्ठन्तमिति वाक्यशेषः, वितियंपि ताव पेच्छामु सव्वाइं णियल्लगाइं। ‘गंतुं तात पुणो गच्छे’ सिलोगो ॥ १८८ ॥ गत्वा स्वजनपक्षं दृष्ट्वा पुनरागमिष्यसि, न हि त्वं तेनाश्रमणो भविष्यसि, यस्त्वं स्वजनमवलोकयित्वा पुनरायास्यसि ‘अकामं ते परक्कमं’ को नाम अणिच्छिओ ‘परक्कमंतं’ति परिजायंतं अथवा यदा त्वं परं प्राप्य निष्णातो भविष्यसि भुक्तभोगत्वात् तदा अकामकं पराक्रमंतं

मातृशुश्रूषादि

॥१०७॥

'को तं वारेतुमरिहति' धरेतुं कं वा ?। पव्वइयगं भणंति–'जं किंचि अणगं तात ! तंपि सव्वं समीकतं' उत्तारियंति वा विमोक्खितं वा एगट्ठं, हिरण्णं ववहाराओ, जो वा णियगो खीणभंडमुल्लो पव्वइओ तं भणंति–हिरण्णं ते कताकतं दासामो, आदिग्रहणात् सुवण्णं वा भंडमुल्लं वा दासामो जेणेव ववहरिस्ससि, व्यवहारार्थं व्यवहाराय, अपि पदार्थादिषु तच्च ते दासामो, अन्यच्च यद्वक्ष्यसि, 'इच्चेवं णं सुसिक्खंतं'सिलोगो ॥१८९॥ साधुक्रियां सुट्ठु सिक्खंतं सुसिक्खंतं पाठान्तरं सुसेहिंति वा–उस्सिक्खावेंतीत्यर्थः, 'कालुणतो उवट्ठितं'ति कलुणाणि कंदंता य रुयंता य णिरिक्खंता य तं उवसग्गेंति, समुट्ठिता उप्पव्वावेतुं, स च तेहिं णाणाविधेहिं 'विवद्धो णातिसंगेहिं, ततो गारं पहावती'गारं नाम अगारत्वं, भृशं वा धावति पधावति। किंचान्यत् 'वणे जातं जहा रुक्खं' सिलोगो ॥१९०॥ कंठयं, एवं परिचिट्ठं(वेढं)ति द्रव्यतो भावतश्च परिवेढणं असमाधीएत्ति, तं तं भणति करेंति य येनास्यासमाधिर्भवति, अथवा असमाधुतादे द्रव्यतो भावतश्च स तैः करुणादिभिः 'विवद्धे णातिसंगेहि हत्थी वाविणवग्गहो ॥१८२॥ कंचित्कालं कासारोच्छुखंडादिभिरनुवृत्त्य पश्चात् आहारग्रहारैर्बाध्यते, तेऽप्येनं पुनर्जातमिव मन्यमानाः तस्याभिनवानीतस्य पिट्ठतो परिसप्पंति, को दृष्टान्तः ?,'सूतिगोव्व अदूरतो' यथा तद्दिनसूतिकागृष्टिर्वत्सकस्य पीतक्षीरस्य इतश्चेतश्च परिधावतो ईषदुन्नतवालधिः सन्नतग्रीवा रंभायमाणा पृष्ठतोऽनुपप्पति, स्थितं चैनं उल्लिखति, अदूरतोऽस्यावस्थिता स्निग्धदृष्ट्या निरीक्षते, एवं बंधवा अप्यस्य उदकसमीपं चान्यत्र वा गच्छंतं मा णासिस्सिहिंति पिट्ठतो परिसप्पंते, चेडरूवं वदे, मग्गतो देन्ति शयनमासीनं चैनं स्नेहमिवोद्गिरंत्या दृष्ट्या अदूरतो निरीक्षमाणा अवतिट्ठंते। 'एते संगा मणुस्साणं' सिलोगो ॥१९३॥ एते इति ये उद्दिष्टाः, सज्जते येन स संगः, मनुष्याधिकार एव वर्त्तते तेन मनुष्यग्रहणं, पाताला नाम वलयामुखाद्याः, सामयिकोऽयं


दृष्टान्तः, उभयाविरुद्धस्तु पातालः समुद्र इत्यपदिश्यते, न तारिमा अतारिमा न शक्यते बाहूभ्यां तर्तुमिति, ‘कीवा’ कातरा जत्थ ‘विसण्णेसी विसण्णं एसतीति विसण्णेसी ‘णातिसंगेहि मुच्छिता’ विसण्णा वा आसंति, विसण्णेसिं णातिसंगेहि मुच्छिता, अथवा कीवा जत्थावकीसंति, अपकृष्यन्ते मोक्षगुणातो धम्मातो वा, किंणिमित्तं णातिसंगेहि मुच्छिता ?, ‘तं च भिक्खू परिण्णाय सवे संगा महासवा’ सिलोगो ॥१९४॥ तदिति यदेतदुक्तं अथवा तमुपसर्गगणं दुविधाए परिण्णाए परिण्णाय, सव्वे इत्यपरिशेषाः, संगा एव महांति कर्माण्याश्रवंतीति। ‘अहिमे संति आवट्टा’ सिलोगो ॥ १९५ ॥ अहो दैन्यविषयामंत्रणेषु, अथवा इमे संति आवट्टा, अथेत्यानन्तर्ये, इमे वक्ष्यमाणाः, संतीति विद्यन्ते, द्रव्यावर्त्ता नदीपूरो, भावावर्त्ता यैः प्रकारैरावर्त्तन्ते संयममीरवः, कासवेण पवेइता–प्रदर्शिता इत्यर्थः, ‘बुद्धा जत्थावसप्पन्ति’ बुद्धा दुविधा–दव्वे भावे य, दव्वे णिद्दाबुद्धा भावे णाणातिबुद्धा, अवसर्पन्ति नाम अवगच्छंति, ‘सीदंति अबुधा जहिं’॥ किंच यः कश्चित्संयतः कस्सति रण्णो पुत्तो वा अरायवंसिओवि कोऽवि रूवसंपण्णो विज्जामंतकलागुणसंपण्णो वा, तंजहा–‘रायाणो रायमच्चा य’ सिलोगो ॥ १९६ ॥ रायाणो चक्कवट्टिमादी, तत्थ बंभदत्तेण चित्तो निमंतिओ, रायमच्चा–इस्सरतलवरमाडंबिगादि माहणा–भट्टा खत्तिया नाम गणपालगा गणभुत्तीए वा भ्रष्टराज्या, जे वा अरायाणो अरायवंसिया णिमंतयंति भोगेहिं ‘भिक्खुयं साधुजीविणं’ति साधुविहीए फासुएण पडोआरेण जीवतित्ति साधुजीवी, अथवा साध्विति प्रशंसायां, शोभनेन जीवनेन जीवतीति, संयमजीवितेनेत्यर्थः, के च ते भोगा ?, इमे, ‘हत्थस्सरहजाणेहिं’ सिलोगो ॥ १९७ ॥ हत्थिअस्सरहादीणि पसिद्धाणि, जाणाणि सीदासन्दमाणिगादीणि, तं पुण जले थले य, जले णावादि, थले सीतासंदमाणिगादी, विहारगमणा इति-उज्जाणियागमणाई, चशब्दादन्यैश्च श्रोत्रादिभिः

श्रीसूत्रकृताङ्गचूर्णिः ॥११०॥

इन्द्रियक्षमैर्विषयैर्यथेष्टतः 'भुंजाहिमाइं भोगाइं' इमानीति विद्यमानानि प्रत्यक्षाणि वा महरिसित्ति, एवमपि असावस्माभिरन्यैर्वा पूजनीयश्च, किंचान्यत्–तमेवं णिमंतयंति 'वत्थगंधमलंकारं' सिलोगो ॥ १९८ ॥ वत्थाणि–अयिणगादीणि गंधा–कुष्ठादयः अलंकारा–हारादयः, स्त्रियः अहं ते धूतं भगिणीं वा देमि, अण्णं वा जं इच्छसि, सयणाइं अत्थुतपच्चुत्थुताणि, चशब्दात् लोही-लोहकडाहकडुच्छुगादीणि सव्वो घरोवक्खरो, सहीणे जारिसो चेव मम परिच्छतो तारिसं चेव दलयामि, तेनोपचितो भुंजाहि-माइं भोगाइं मया विधीयमानानि, आउसो ! पूजयामि ते, साम्प्रतमेभिर्वस्त्रादिभिः पूजयामि, पूजयीष्यामश्च त्वं, सर्वसत्त्ववशयिता भविष्यसि, किं चान्यत्–न च तवास्माभिरभ्यर्थ्यमानस्य कृततपःप्रणाशो भविष्यति, कथं ?,'जो तुमे णियमो चिण्णो'सिलोगो ॥ १९९ ॥ इंदियणोइंदिएहिं चीर्णो–कृतः भिक्खुभावंमि उत्तमो, भिक्खुभावो णाम पव्वज्जा. उत्तमो असरिसो, अगारमावसं-तस्स सव्वसो चिट्ठती, तथा संविज्जते वा, न विनश्यतीत्यर्थः, लोकसिद्धमेव ससुकयस्स विपुलत्ता। किंचान्यत्–'चिरं दूइज्जमा-णस्स' सिलोगो ॥२००॥ चिरं तुमे धम्मो कतो, दूइज्जता य णाणापगारा देसा दिट्ठा, तनोवणाणि तित्थाणि य, 'दोप इदानीं कुतस्त्व ?' किं त्वया चौरत्वं कृतं पारिदारिकत्वं वा ?, अथवा दोसो पावं अधर्म्म इत्यर्थः स कुतस्त्व ?, क्षपितस्त्वया, कृतं सुम-हत्तपः, ण य ते उप्पव्वयंतस्स वयणिज्जं भविस्सति, किं भवं चोरो परदारिगो वा ?, ननु तीर्थयात्रा अपि कृत्वा पुनरपि गृहमा-गम्यते, एवमादिभिः हस्त्यश्वरथवस्त्रादिभिः निमन्त्रणैश्च ते अणियल्लगा वा 'इच्चेव णं णिमंतेंति णोयारेण व सूयरं' णीयारो णाम कुंडगादिया, स तेण णीयारेण ट्ठितो घरे सूयरगो अडविं ण वच्चति मारिज्जति य एवं सोऽवि असारेहि णिमंतितो तं भोत्तुं मरणणरगादियाइं दुक्खाइं पावेंति। 'चोदिता भिक्खुचरियाए' सिलोगो ॥ २०१ ॥ चोदिता नाम वेधिता तज्जिया बाधिता

वस्त्रादि प्रलोभनं

॥११०॥



श्रीसूत्रकृताङ्गचूर्णिः ॥१११॥

इत्यर्थः, चरणं चर्या–चक्कवालसामायारी, जवइत्तएत्ति वा लाढेत्तिएत्ति वा एगट्ठं, 'तत्थ मंदा विसीदंति उज्जाणंसि व दुब्बला' केइ आयसमुत्थेहिं केई परमसमुत्थेहिं केई उभयसमुत्थेहिं, ऊर्द्धं यानं उद्यानं, तच्च नदी तीर्थस्थलं गिरिपब्भारो वा, तत्थ पुंगवावि य आरुभंता सातिज्जंति, किमंग पुण दुब्बला दुप्पदा चतुप्पदा वा ?, एवं केऽपि पव्वयंता चेव भावदुब्बला सीयंति, किं च-'अचयंता य लूहेणं' सिलोगो ॥२०२॥ अचएंता–अशक्नुवन्तः, लूहं दव्वे य भावे य, दव्वे आहारादि, भावलूहं संयम एव, तवोवधाणेण तज्जिता अवहत्थिता, तत्थ मंदा विसीदंति, पंके जीर्णगौः जरद्गवत् 'एयं णिमंतंणं लद्धुं'सिलोगो ॥२०३॥ एतं णिमंतणंति जं हेट्ठा भणियं, लद्धुं–प्राप्तुं मुच्छिता विसएसु, गिद्धा इत्थिगासु, अज्झोववण्णा कामेसु, कामा–इच्छामदणकामाः, चोइज्जंता णाम णिब्भत्थिज्जंता परिस्सहेहिं, णिमंतिज्जमाणा वा, गिहगयत्ति बेमि, पुनर्गृहं गत्वा पुनर्गृहस्थीभूत्वा इत्यर्थः, णिज्जुत्तीए वुत्तो दुविधा उवसग्गा ओहे ओवक्कमे य, अज्झत्थविसीयणा य, स च बालपव्वइतो तरुणीभूतश्चिन्तयति–चिरकालं प्रव्रज्या दुष्करा कर्तुमित्यतो विसीदंति, दृष्टान्तः 'जहा संगामकालंमि' सिलोगो ॥ २०४ ॥ येन प्रकारेण यथा, सङ्ग्रामकालो नाम सममि- चारितं युद्धं, तत्थ कोइ वच्चंतो भीरु पच्छतो उवेहति 'वलयं गहणं णूमं' वलयं णाम एकदुवारा गड्डा, परिक्खो वा वलयसं- ट्ठितो वलयं भण्णति, गृह्यते यत्तद्गहनं–वृक्षगहनं लतागुल्मवितानादि च, नूमं नामाप्रकाशं, जत्थ णूमेति अप्पाणं गड्डाए दरिए वा, 'को जाणेति पराजये'त्ति दैवायत्तो हि पराजयो, 'मुहुत्ताणं मुहुत्तस्स' सिलोगो ॥ २०५ ॥ मीयतेऽनेनेति मुहूर्त्तः, बहूनां हि मुहूर्त्तानां एकः मुहूर्त्तो भवति यत्र विजयो भवति पराजयो भवति वा, जयश्चेत् इत्यतः शोभनं, पराजयश्चेदित्यतो वरं पराजयतो अवसर्पिष्यामः, अवसर्पितो इति भीरू उवेहती, एस दिट्ठंतो, अयमर्थोपणयो–'एवं तु समणा एगे' सिलोगो ॥२०६॥

मंदविहादः

॥१११॥

अस्य पृष्ठे तृतिय् अध्ययनस्य तृतिय उद्देशक: आरभ्यते

प्रत सूत्रांक ॥२०४-२२४॥


दीप अनुक्रम [२०४-२२४]

श्रीसूत्रकृताङ्गचूर्णिः ॥११२॥

एवमनेन प्रकारेण 'तु' पूरणे, एगे, ण सव्वे, संजमे तैस्तैः प्रकारैः अबलं ज्ञात्वा अप्पगं 'अणागयं भयं दिस्स' अणागतं णाम अप्पत्तं, मा णाम एवं होज्जत्ति, ततः 'अवकप्पंतिमं सुतं' अव च रक्षणादि, अवकल्पयंति अधीयंत इत्यर्थः,'इमानी'ति अर्थोपार्जनसमर्थानि गणियणिमित्तजोइसवायसद्दसत्थाणि,'को जाणति वियोवायं' सिलोगो ॥२०७॥ विउवातो णाम व्युपातः, सो उण इत्थीपरीसहातो भवति, ण्हाणपियणादिणिमित्तं उदगाओ वा, वा विकप्पे, जो वा जस्स पलिओवमादि, परिसहजिता अमुकेण लिंगेण कोंटलवेंटलादीहिं कज्जेहिं अबुज्झाणेण चोदिज्जंता य वक्खामो, चोदिज्जंता-पुच्छिज्जंता, प्रायशः कुण्टलट्ठीओ लोगो समणे पुच्छति, तत्थ चरेस्सामो, विज्जामंते य पउंजिस्सामो 'णो ण अत्थि पकप्पियं'ति ण किंचि अम्हेहिं पुव्वोवज्जितं धणं पेइयं वा, एवं णच्चा पावसुतपसंगं करेंति, 'इच्चेवं पडिलेहंति' ॥२०८॥ इति एवं इच्चेवं, पडिलेहंति णाम समीक्षंते-संप्रहारेंति, भावग्गहणं भावणूमाइं पडिलेहंति, 'वितिगिंछासमावण्ण'ति, किं संजमगुणे सकेस्सामो ण सकेस्सामोत्ति, उक्तं हि-"लुक्खमणुण्हमणियतं कालाइक्कंतभोयणं विरसं।" दिट्ठंतो पंथाणं व अकोवितो, जहा देसितो विगलपथे चिंतेंतो अच्छति-किमयं पंथो इच्छितं भूमिं जाति ?, एगच्चोवि ण णिव्वहति, अकोविया अयाणगा, उक्ताः अप्पसत्था, इदाणिं पसत्था-'जे तु संगामकालंमि' सिलोगो ॥२०९॥ जेत्ति अणिद्दिट्ठणिद्देसे, तु विसेसणे, ज्ञाता णाम प्रत्यभिज्ञाता नामतः कुलतः शौर्यतः शिक्षातः, तद्यथा-चक्कवट्टिबलदेवा वासुदेवमाण्डलीकादयः, प्राकृतास्तु वीरपट्टगेहिं वद्धगेहिं सण्णद्धवद्धवम्मियकवयउप्पीलियसरासणपट्टिया गहियाउधपहरणा समूसियधयग्गा सूरा एवं चक्कवट्टयादीनां पुरतो गच्छंति, सुरपुरंगमा न ते बलयादीणि पडिलेहन्ति, ते तु संपहारेंति "तरितव्वा च पइण्णिया मरियव्व वा समरे समत्थएणं। असरिसजणउल्लावया ण हु सहितव्वा कुले पसूयएणं ॥१॥ परबलं जेतव्वं

अनागत-भयादि

॥११२॥



श्रीसूत्रकृताङ्गचूर्णिः ॥११३॥

मरियव्वं वा, ण उ पिट्ठतो पेहंति, अपत्ते जुद्धे जुद्धमाणे वा, किं परं मरणं भवेत् ?, मरणादप्यनिष्टतमं अश्लाघ्यत्वं, मरणादपि विशिष्यते भग्नप्रतिज्ञजीवितं, उक्तः प्रशस्तदृष्टान्तः, तदुपसंहारः प्रशस्त एव। ‘एवं समुट्ठितं भिक्खुं’ सिलोगो ॥ २१० ॥ सम्यग् उत्थितं समुत्थितं दव्वसमुत्थाणेण भावसमुत्थाणेण य, आगारबंधणं छित्ता अज्झत्थो, अवसीतयाणं ‘आरंभं तिरियं कट्टु’त्ति दव्वे भावे वाऽऽरंभः, तिरियं णामादि, तिरिच्छं बोलेंति, अनुलोमेहिं दुक्खमतिक्राम्यंते नदीश्रोतोवत् परीसहोपसर्गा, णिउणो णेव्वाणगजकंखी, अत्तत्ताए–आत्महिताय सर्वतो संव्रजेत्, सिद्धिगमनोद्यतेन मनसा, अथवा आतो–मोक्षो संजमो वा अस्यार्थः, आतत्थाए, अथवा आप्तस्यात्मा आप्तात्मा आप्तात्मैव आत्मा यस्य स भवति अप्पात्मा इष्टो, वीतराग इव व्रजेदित्यर्थः, अज्झत्थविसीदणत्ति गतं। इदाणिं परवादवयणं, तं अत्तट्ठाए परिव्वयंतं ‘तमेगे पडिभासंति’ सिलोगो ॥ २११ ॥ तमिति तं अत्तट्ठयाए संवुडं रीयमाणं, एगे ण मव्वे, समंता भासंति परिभासंति, आजीवप्रायाः अन्यतीर्थिका, सुत्तं अणागतोभासियं च काऊण बोडिगा, ‘साधुजीवणं’ति णाम साधुवृत्तिः अपापजीवनमित्यर्थः, जे ते एवं भासंति ‘अंतए ते समाहिते’ अंतए नामानाभ्यन्तरतः–दूरतस्ते समाधिए, णाणादिमोक्खो परसमाधी, अत्यन्ते असमाधौ वर्त्तन्ते, असमाहिए अकारलोपं कृत्वा, संसारे इत्यर्थः, किं प्रभाषन्ते ? ‘संबद्धसमकप्पाओ’ सिलोगो ॥२१२॥ समस्तं बद्धाः संबद्धा-पुत्रदारादिभिर्ग्रन्थैर्गृहस्थाः, संबद्धैः समकल्पाः तुल्याः इत्यर्थः, जहा गिहत्था माता मे पिता मेत्ति एवमादिभिः संगैर्बद्धा, अण्णमण्णसमुत्थिता णाम माता पुत्ते मुच्छिता पुत्तोवि मातरि एवं भवंतोऽपि शिष्याचार्यादिभिः परस्परसंबद्धाः, अन्यच्चेदं कुर्वता ‘पिंडवातं गिलाणस्स, जं सारेध दलाध य’ पिंडस्य पातः पिंडपातः भिक्षं, एवं पिंडावायं गिलाणस्स आणेत्ता दद्धुं, यच्च परपरतः सारेध वारेध पडिचोदेध सेज्जातो

समुत्था-नादि

॥११३॥

उद्दवेहन्ति, जं च गिलाणस्स आयरियवुड्ढमामाएसु आहारउवधिवसधिमादिएहि य उवग्गहं करेह 'एवं तुब्भे सरागत्था अण्णमण्णमणुवसा' सिलोगो ॥ २१३ ॥ रागस्थिता सरागत्था सदोसमोहा, अन्योऽन्यस्य अनुगता वशं अणुव्वसा 'भट्ठसप्पधसब्भावा' शोभनः पंथा सत्पन्थाः ज्ञानादि, सतो वा भावः सद्भावः, सत्पथसब्भावो नाम यथार्थोपलंभः,'संसारस्स अपारगा' पारं गच्छंतीति पारगा न पारगा अपारगाः। एवं भासमाणेसु 'अह ते पडिभासेज्जा' ॥ २१४ ॥ अथेत्यानन्तर्ये तान् प्रतिभाषते 'भिक्खू मोक्खविसारदो' विसारदो नाम सिद्धान्तविनायकः, स किं पडिभासति ?, एवं तुज्झेऽवभासंता दुवक्खं चेव सेवधा, दुपक्खो णाम संपराईयं कम्मं भण्णति गृहस्थत्वं च, किंच 'तुब्भे भुंजह वाएसु' सिलोगो ॥२१५॥ तुब्भे जेहिं भिक्खाभायणेहिं भिक्खं गेण्हध तेहि आसंगं करेह, आजीविका परातकेसु कंसपादेसु भुंजंति, आधारोवकरणसज्झायज्झाणेसु य मुच्छं करेह, गिलाणस्स पिंडवातपडियाए गंतुमसमत्थस्स भत्तमंतेहिं कुलगेण वा अण्णतरेण वा मत्तेहिं अभिहडं भुंजेह, एवं तुब्भेहिं पादपरिभोगेहिं बंधोऽणुण्णाओ भवति, अन्तरा य कायवधो, सो य तुब्भ णिमित्तं आणंतो भत्तिमंतोऽवि कम्मबंधेण लिप्पति, पाणिपायंपि ण कायव्वं जति पादे दोसो, स च किं तुब्भ देंतो णट्ठसप्पधसब्भाव उदाहु सप्पधि वट्टति ?, अविण्णाणा य मिगसरिसा तुब्भे जेण असंकिताइं संकथ संकितट्ठाणाइं ण संकथत्ति,'तं च बीओदगं भोत्त'त्ति कन्दमूलानि ताव सयं भुंजह, सीतोदगं पिबध, एवं पुढवितेउवाउवधे वट्टह, जं च छक्कायवधेण णिप्फण्णं उद्देसियं तं भुंजह, तुब्भे चेव गिहत्थसरिसा, पावतरा वा गिहत्थेहिं, येन ते गृहस्था अनभिगृहीतमिथ्यादृष्टयोऽपि भवंति, न तु भवंतः, जेण अभिग्गहितमिच्छदिट्ठिणो साधुपरिवायं च करेह, दव्वं खित्तं कालं सामत्थं च पुणो वियाणित्ता कीतकडच्छेज्जादिसुवि दोसा भाणितव्वा, ते एवं असंजतेहिंतोऽवि पावतरा


कता समाणा महता अपत्तिए 'लित्ता तिव्वाभितावेणं सिलोगो ॥२१६॥ तिव्वाभितावो णाम तीव्रोऽमर्षः दंसणमोहणिज्जकम्मोदएणं कोधमाणकसायोदएण य लित्ता, उज्झिता णाम शून्या, एतदेव व्याचष्टे–अण्णा, णाणदंसणचरित्तेहिं असमाहिता, तैरेव विहीणा,'णाइकंडुइयं साधु'त्ति जहा कंडुइयं साधुत्ति तं अरुकस्स अवरज्झति पच्चुयपीडाहेतुत्वात्, एवं साधुहीलणावि अपसत्था, अथवा 'लित्ता तिव्वाभितावेणं'ति तेण मिच्छादंसणावलेवेण लित्ता गुणेहिं शून्या बुद्ध्यादीहिं असमाहिता आतुरीभूता भणंति–जुत्तं णाम तुब्भेहिं अम्हे गिहत्थसरिसा काउं पावतरा वा, तेन त उच्यन्ते 'णातिकंडुइतं साधु' साधु णाम सुदट्ठु, अरुअं हि रुज्झमाणं खज्जइ, तं जति ण सुट्ठु कंडूइज्जइ ततो णातिकंडुइणो साधु अवरुज्झति अरुगस्स अरुइअगत्तस्स वा, अर्थात् प्राप्तं अतिकंडुइयंति भृशमपराध्यते, नातिरूढव्रणस्य, एवं यद्यहं त्वया णातिनिष्ठुरं उक्तो भविष्यति ततोऽहमपि नातिनिष्ठुरमेवापदिश्यात्, त्वया वाऽहं यत्किंचनप्रलापिनाऽसंबंधसमकल्पो व्यपदिष्टः, न चाहं तैर्गुणैर्युक्तो, भवन्तस्तु कन्दमूलोदकभोजिनः उद्दिश्यकृतभोजिनश्च सच्छासनप्रत्यनीकाश्च तेन न कथं गृहस्थैः पापतरा इत्येवं 'तत्तेण अणुसट्ठा ते' सिलोगो ॥ २१७ ॥ तच्चं तथ्यं सद्भूतं नानृतमित्यर्थः, अणुसट्ठा णाम अणुसासिता, ते इति आजीविकाः वोडियादयो ये चोद्दिश्यभोजिनः पाखण्डा,'अपडिण्णेणं'ति विसयकसायणियत्तेण जाणएण एवं वुत्ता भणंति–'ण य एस णितिए मग्गे' णितिओ णाम नित्यः अव्याहतः एषः 'असमीक्ष्य वति कितौ' कृतिर्नाम कुशलमतिः पौर्वापर्यसम्बन्धसद्भावार्थोपलम्भस्तु सर्वज्ञज्ञानात् युक्तः, अथवोपदेश एवायं, तत्तेण अणुसट्ठाए अपडिण्णेण जाणएत्ति, कमणुसट्ठाए?, ण एस णितिए मग्गे, न एष भगवतां नीतिको मार्गो, नीतिको नाम नित्यः, एष हि असमीक्ष्य भवद्भिरेव वाचा चटकरसा(श्रा)त्रा वा कृतिः-कृतः। किंचान्यत् 'एरिसा जा वई एसा'सिलोगो ॥२१८॥

श्रीसूत्रकृ-ताङ्गचूर्णिः ॥११६॥

एरिसा णाम येयमुक्ता तुब्भे संबद्धसमकप्पा वयं नेति, एषा निर्वाहिका, कथं ?,'अग्गिवेलुव्व करिसिता' वेल्लो हि मूले स्थिरः अग्गे कर्षितः, एवमियं वाक् भवतां संकल्पस्थूला–निश्चयकृता न हि भवति, न संबद्धकल्पा, तथा चोक्तं, कंदमूलादि, उद्दिश्य-भोजित्वाच्च, यतश्चैवं तेन नैष भवतां वाङ्निश्चयः सुन्दरः, अथवा एरिसा जा वई एसा अग्गे वेलुव्व करिसितित्ति जहा धम्मी, कडिल्ले वंसो मूलच्छिण्णो न शक्यते अन्योऽन्यासंबंधत्वात् न शक्यतेऽधस्तात् उपरिष्टाद्वा कर्षितुं, अथासौ वंसो न णिव्विहति, एवं भवतामपि इयं वाक् न निर्वाहिका, तत्र अनिर्वाहिका गिहिणो अभिहिताः, शेषं भवंतो हि सम्प्रतिपन्ना निर्मुक्तत्वात्संसारान्तं करिष्यामः, तन्न निर्वहति, कथं ?, यद्भवतां ग्लायतामग्लायतां गृहस्थः कन्दादीनां मात्रेणानयित्वा ददाति, तत्किल भोक्तुं श्रेयः, न तु यद्भिक्षुणाऽऽनीतमिति, एषा हि वाङ् भवतां न निर्वाहिका, कथं गृहस्था ईर्यांति शोधयंति, आगच्छतो चास्य कश्चिद् व्यापादः स्यात्, कश्चानुक्त एवं ब्रूयात् यथा 'गृहीणं अभिहडं सेयं, भुंजितुं ण तु भिक्खुणो' किं च–'धम्मपण्णवणा एसा' सिलोगो ॥ २१९ ॥ धम्मस्स पण्णवणा एसा साहिया, इदाणिं धम्मपण्णवणा गिहत्थाणीयं सेयं ण पव्वइताणीतमिति 'सारंभाण विसोधिया' सारंभा णाम गिहत्था तेषां पापविशोधिका, न हि भवद्भ्यो ददतो विशुद्ध्यन्ते, न तु प्रव्रजिताः दाणधम्मेण संयुज्यंते, यस्मादानयंति ते गृहीभूत्वा यतयः पापेन संबद्ध्यन्ते, 'ण तु एताहिं दिट्ठीहिं' नेति प्रतिषेधे, दृष्टिर्नाम ग्रहो, ण भवद्भिरेता-भिर्दृष्टिभिः पूर्वप्रकल्पितमासीत्, प्रकल्पितं प्रदर्शितमित्यर्थः, का दृष्टयः?, यादृशं किल गृहस्थानां तादृशमस्माकमपि अन्योऽन्यं किल सारयित्वा स्थेयं, न चानुकंपतामनुभवन्तोऽपि ग्लानकृत्यं गृहस्थैः कारयन्ति, अत्र तावदावयोः साम्यं, येन भवन्तो गृहस्थैः कारयन्ति प्रागुक्तं ग्लानस्य तत्कार्यं, मा भूत् संबंधसाम्यकल्पा, न स्युरिति अभिविष्यत्, इदानीं स एव ग्लानो गृहस्थैः कारयन्

संबद्धसम-त्वादि

॥११६॥



श्रीसूत्रकृताङ्गचूर्णिः ॥११७॥

तत्कृतमनुजानन्तः भवंतश्च तत्कारिणः तद्वेषिणश्च एतां दृष्टिं भावयन्तः कथं सम्बन्धसमकल्पा न स्युरिति, किं चातः?, एवं 'सव्वाहि अणुजुत्तीहिं' सिलोगो ॥२२०॥ योजनं युक्तिः अनुयुञ्जत इति अनुयुक्तिः अनुगता अनुयुक्ता वा युक्तिः २ सर्वैः हेतुयुक्तिभिः तर्कयुक्तिभिर्वा, अत एव अचयंता अशक्नुवन्तः 'जवित्तए'त्ति णिजङ्गमित्यनर्थान्तरं, कथं ण चएति?, यथा कश्चिद्बलीवर्दं भग्नं वा उवमए, स च तं विचिकीर्षुः परेणोच्यते–उत्थाप्यतां तावदयं गौः, ततो यदि शक्ष्यति तत एव ग्रहीष्यामि, स जनो नैष शक्ष्यतीति ब्रवीति–यदि ते रोचते एवमयं गृह्यतां, नन्वेषोऽव्यंगशरीरो निरुपहतवपुर्न दृश्यते?, एवं सामयिक आह परूको वा, समय इति परैरुच्यते, येन परीक्षामहे ततो ब्रूते किमत्र परीक्षया?, प्रत्यक्ष एवायं दृश्यते बहुजनपरिगृहीतः, ईश्वरस्वामिनं प्रतिपन्नाः, यदि नैवं तत्त्वं स्यात् नैवात्र बहुजनोऽतिप्रसज्यते, लोकिका अपि ब्रुवते–'आज्ञासिद्धानि चत्तारि' न हन्तव्यानि हेतुभिः। भारतं मानवा धर्म्माः, सांगो वेदश्चिकित्सितं ॥१॥ एषामुत्तरः–एरंडकट्ठगसी जहेह गोसीसचंदणपलस्स । मोल्लेण होज्ज सरिसे कत्तिय-मेत्तो गणिज्जंतो?॥१॥ तहवि णिगरातिरेगो सो रासी जह ण चंदणसरित्थो । तह णिव्विण्णाणमहाजणोऽवि सोज्झे विसंवदति ॥२॥ एक्को सचक्खुगो जह अंधलयाणं सएहिं बहुएहिं । होति पहे गहिया वा बहुगावि ण ते अपेच्छंता ॥ ३ ॥ एवं बहुगावि मूढा ण पमाणं जे गतिं न याणंति । संसारगमणगुविलं णिउणस्स य बंधमोक्खस्स ॥४॥" 'ततो वादं णिराकिच्चा' ततः इति ततः कारणात्, वादो णाम छलजातिनिग्गहस्थानवर्जितः, निराकिच्चा णाम पृष्टतः, वादं निराकृत्वा, ते इति ते आजीविकाद्याः सामयिकाः मस्करास्च विविधाः प्रगल्भिता धृष्टीभूता इत्यर्थः, 'रागदोसाभिभूतप्पा' सिलोगो ॥२२१॥ रज्यते येन आत्मपक्षे स रागः परपक्षे द्वेषः, अभिभूताः पराजिता इत्यर्थः, रागद्वेषाभ्यामभिभूतो येषामात्मा ते, मरुगा दोसाभिभूयप्पा, 'मिच्छत्तेण अभि-

अनुयुक्त्याद्यः

॥११७॥

दुया' अभिभूया इत्यर्थः, त एवं उक्ताः रोषानललोहिताक्षाः भृशममर्षोद्गमप्रस्पंदिताधरोष्ठाः जिता अवदातैर्हेतुभिर्निर्ग्रन्थपुत्रैः पराजिताः 'अक्कोसे सरणं जंति' प्रायेण दुर्बलस्य रोषो उत्तरं भवति आक्रोशश्च, रुदितोत्तरा हि स्त्रियः बालकाश्च, क्षांत्युत्तराः साधवो, दृष्टान्तः 'टंकणा इव पव्वतं' टंकणा णाम म्लेच्छजातयः पार्वतेयाः, ते हि पर्वतमाश्रित्य सुमहन्तमवि हत्थिबलं वा अस्सबलं वा आगलिन्ति, पराजितास्तु शीघ्रं पर्वतमाश्रयंति, कुतीर्थाः पराजिताः आक्रोशयंति यष्टिमुष्टिमिश्रोत्तिष्ठन्ति, न ते प्रत्याक्रोष्टव्याः इदमालंबनं कृत्वा-"अक्कोसहणणमारणधम्मब्भंसाण बालसुलभाणं। लाभं मण्णति धीरो जधुत्तराणं अलाभंमि ॥१॥'बहुगुणप्पकप्पाइ० सिलोगो ॥२२२॥ गुणा पकप्पिज्जंति जेहिं ताइं गुणप्पकप्पाइं, गुणप्पकप्पो णाम येनात्मपक्षः प्रसाध्यते, परपक्षश्चोभासीयते, अथवा सर्वपरीक्षकाविरुद्धो दृष्टान्तोऽवाध्यो हेतुर्वा, उक्तंहि—"लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः, हेतुप्रतिज्ञादयः, आतसमाहितो वत्तए, आत्मसमाधिर्नाम दव्वं खित्तं कालं समत्थं चऽप्पणो वियाणित्ता इति, अथवा के अयं पुरुषे कं च णतेत्ति, एवं तथा यथाऽऽत्मनो समाधिर्भवति, उक्तं हि—"पडिपक्खो णायव्वो०" अथवा आत्मसमाधिर्नाम यथा परतो घातो न भवति बाधा वा, किंच-'जेणऽण्णे ण विरुद्धेज्ज' येन चोक्तेन अण्णस्स उवघातो ण भवति, तथा प्रतिज्ञादयो वक्तव्याः यथा च सिद्धान्तविरुद्धा न भवंति, कथं विरुध्यते ?, यो ब्रूयान् त एव हि कृतोद्दिश्यभोजित्वाद् गृहितुल्याः, साधवस्तु मूलोत्तरगुणोद्यताः शरीरे चानपेक्षाः, ततश्चातिप्रसक्तस्य लक्षणस्य निवृत्तये त्वपदिश्यते 'इमं च धम्ममायाय' सिलोगो ॥२२३॥ अथवा तैः परतत्त्वैरपदिष्टं-ध्यानकृत्यं हि न कर्त्तव्यं, मा भूत् संबद्धसमकल्पः, तदेनमपदिश्यते 'इमं च धम्म०' न यथा भवतां निरनुकंपो धर्म्मः, अस्माकं हि इमं च धम्ममादाए कासवेण पवेइयं, अथवा ये ते उक्ता उपसर्गा एते हि अग्लायता सोढव्याः, ग्लायतो हि

द्रव्यपरीषहा भवंति, न ग्लायमानस्य न कर्त्तव्यं, कथं–'इमं' इदं च धम्ममादाय इति यद्वक्ष्यामः। तं धर्ममादाय–गृहीत्वा 'कासवेण पवेदितं' कासवग्रहणात्तीर्थकरणैवेदं प्रवेदितं, न तु स्थविरैः, किंचान्यत् 'कुर्यात् भिक्खू गिलाणस्स' ग्लायते रोगेणान्यतरेण वा प्रथमद्वितीयादिपरीषहादिना, अगिलाणेण–अनार्दितेन अव्यथितेन राजाभियोगवत् 'समाधिए'त्ति आत्मनः समाधिहेतोः कर्त्तव्यं, ग्लानस्य वा अथवा समाधीए कायव्वं, ण मणोदुक्कडेण, किंच–न केवलं उवसग्गा एव अहियासेयव्वा ज्ञात्वा सोढव्याः 'संखाय पेसलं धम्मं' सिलोगो ॥२२४॥ संखा अट्ठविधा, तंजहा–णामसंखा ठवणसंखा दव्वसंखा उवम्मसंखा परिणामसंखा गणणासंखा जाणणासंखा भावसंखा, तत्थ जाणणासंखाए अधियारो, संखाय–ज्ञात्वा, पेसलं दव्वे भावे य, दव्वे जं दव्वं पीतिमुत्पादेति आहारादि, भावपेसलस्तु सर्ववचनीयदोषापेतो भव्यानां धर्म्म एव, सो धम्मो दुविधो–सुतधम्मो चरित्तधम्मो य, कस्य तौ प्रीतिमुत्पादयेयातां ?, दृष्टिमानिति दृष्टिमतः, सम्यग्दृष्टिः परिनिर्वृत्तः सीतीभूत इत्यर्थः, उवसग्गे अधियासेयव्वे उपसर्गा ये उक्ताः ये च वक्ष्यमाणाः तान् सर्वानिधियासयन् सहन्नित्यर्थः, आमोक्षाय परिसमाप्तेः समन्ता 'परिव्वएज्जासि' परिव्वयेज्जासि, मोक्षो द्विविधः–भवमोक्षो सव्वकम्ममोक्खो य, उभयहेतोरपि आमोक्षाय परिव्रजेदिति ब्रवीमि । उपसर्गपरिज्ञायां तृतीयोद्देशकः ४–३ ॥

वुत्तं निज्जुत्तीए हेतुसरिसेहिं अहेउएहिं, हेत्वाभासैरित्यर्थः, कथमहेतवो हेतुसदृशाः ?, वक्ष्यति हि सुहेण सुहमज्जेमो० वणिज्जवत्, तथा च 'जहा गंडं पिलागं वा' एवं सीलक्खलिया अण्णउत्थिया तब्भावुक्काश्च 'आहंसु'रिति ॥२२५॥ आहुः, के ते ?– महापुरिसाः पहाणा पुरिसा, राजानो भूत्वा वनवासं गत्वा पच्छा णिव्वाणं गताः, 'पुव्विं तत्ततवोधणा' पुव्वमित्यतीते काले

अस्य पृष्ठे तृतिय अध्ययनस्य चतुर्थ उद्देशक: आरभ्यते

क्वचित्रेतायां द्वापरे च, तप एव धनं तपोधनं, तप्तं तपोधनं यैः त इमे तप्ततपोधना, पंचाग्नितापादि लोइयाणं ते ते महापुरिसा, आस्माकं तु यदा सामन्नं प्रतिपन्नाः तदा महापुरिसा,'भोच्चा सीतोदकं सिद्धा' सीतोदगं णाम अपरिणतं, तेण सोयं आयरंता ण्हाणपाणहत्थादीणि अभिक्खणं सोएंता तथाऽन्तर्जले वसंतः सिद्धिं प्राप्ताः सिद्धाः, एवं परंपरश्रुतिं श्रुत्वा अस्नानादिपरीषहजिताः 'तत्थ मंदे विसीदंति' तत्रेति तस्मिन्नस्नातकव्रते फासुगोदयपाणे वत्ति,तत्थिमे'अभुंजिया णमी वेदेही एमाउत्ते य भुंजिया। बाहुए उदयं भोच्चा तहा नारायणे रिसी ॥२२५॥ आसिले देविले चेव, दीवायणमहारिसी। पारासरा दगं भोच्चा, बीताणि हरिताणि य ॥२२६॥' 'एते पुर्विं महापुरिसा' ॥२२७॥ प्रधानाः पुरिषाः महापुरिषाः आहिता-आख्याता,'इह संमत'त्ति इहापि ते इसिभासितेसु पडिज्जंति, णमी ताव णमिपव्वज्जाए सेसा सव्वे अण्णे इसिभासितेसु, असिले देविले चेवत्ति बंधाणुलोमेण गतं, इतरथा हि देवल आसिल इति वक्तव्यं, एतेसिं पत्तेयबुद्धाणं वणवासे चेव वसंताणं बीयाणि हरिताणि य भुंजंताणं ज्ञानान्युत्पन्नानि, यथा भरतस्य आदंसगिहे णाणमुप्पण्णं, तं तु तस्स भावलिंगं पडिवण्णस्स खीणचउकम्मस्स गिहवासे उप्पण्णमिति, ते तु कुतित्था ण जाणंति कस्मिन् वर्त्तमानस्य ज्ञानमुत्पाद्यते कतरेण वा संघतणेण सिज्झति?, अजानानास्तु ब्रुवते० ते नमी आद्या महर्षयः भोच्चा सीतोदगं सिद्धाः, भोचेति भुंजाना एव, सीतोदगं कन्दमूलाणि वा, जोइं च समारंभंता,'जहमेतमणुस्सुतं'ति भारहपुराणादिसु एवं एताहि कुसुतीउवसग्गेहिं उवसग्गिज्जमाणे, ण केवलं सरीरा एव उवसग्गा, माणसा अपि उपसर्गा विद्यंते, यां श्रुतिं श्रुत्वा मनसा विनिपातमापद्यंते, कथं?, उच्यते 'तत्थ मंदा विसीदंति' ॥ २२८ ॥ तस्मिन्निति कुश्रुतिउपसर्गोदये मंदा-अबुद्धयः विसीदंति-फासुएसणिज्जे छक्कापएसु अ परिहरितव्वेसु, दिट्ठंतो 'वाहच्छिण्णा व गद्दभा'

नम्यादयः

॥१२०॥

मारेणेत्यर्थः, खंधेन पृष्ठेन वा, एवं ते परसामयिका कर्मगुरुगा लुक्खमणुण्हमणियतं एरिसेण लूहेण अजवेत्ता अस्नानादि ताव संजमगुणे य गुरुए अचइत्ता वोढुं त्वरितमोक्षाध्वगानां साधूनां लघुभूतानां पीढाभ्यां परिसर्पतीति पीढसप्पी, संभ्रमंति तस्मिन्निति संभ्रमः, जनस्यान्यस्य त्वरितमग्गिभयात् णस्सितुकामो किल पीढसप्पी दूरातोऽज्झितोऽपि जणं वा वच्चंतं पिट्ठतोऽणुवयति, एवं तेऽवि किल संसारभीरवो मोक्षप्रस्थिताः सीतोदगादिसंगात् संसार एव पडंति। इदानीं शाक्याः परामृश्यन्ते—**इहमेगे तु मण्णंते सातं सातेण विज्जती** ॥२३०॥ सायं णाम सुखं श्रोतादि तं सातं सातेणेव लभ्यते, सुखं सुखेन लभ्यत इत्यर्थः, वयं सुखेन मोक्षसुखं गच्छामः, दृष्टांतो वणिजः, तुब्भे पुण परमदुक्खितत्वात् ‘जितत्थ आयरियं मग्गं’ जिता नाम दुःखप्रव्रज्यां कुर्वाणा अपि न मोक्षं गच्छत, वयं सुखेनैव मोक्खसुक्खं गच्छामः इत्यतो भवंतो जिता, तेनासदीयार्यमार्गेण ‘परमं’ति समाधित्ति मनःसमाधिः परमा, असमाधीए शारीरादिना दुःखेनेत्यर्थः। ‘मा एतं अवमण्णंतो’सिलोगो ॥२२९॥ अमाणोणा प्रतिषेधे, अथ तद्दुःखप्रणीतं सुखात्मकं मार्गमवमन्यमानाः आत्मानमात्मना वंचयंते इत्यर्थः, दूरं दूरेण सुखातो, लुंपह छिन्दथ, दिट्ठंतो ‘एतस्स अमोक्खाए अयहारीव जूरेथ’ त एवं वदंतः प्रत्यंगिरादोषमापद्यंते, कथं ?, ‘इहमेगे तु मण्णंता सातं सातेण विज्जते,’ इहेति इह निर्ग्रंथशासने, सातं साते न विद्यते, का भावना ?–नहि सुखं सुखेन लभ्यते, यदि चेवमेवं तेनेह राजादिनामपि सुखिनां परत्र सुखिना भाव्यं, नारकाणां तु दुःखितानां पुनर्नरकेष्वेव भाव्यं, तेन साया सोक्खस्संगे न, ‘जिता नाम शिरस्तुण्डमुण्डनमपि कृत्वा सम्यग्मार्गमास्थाय मोक्षं गच्छंति, परमं च समाधिं ता मोक्खसमाधिं, इह वा जाऽसंगसमाधि, उक्तं हि—“नैवास्ति राजराजस्य तत्सुखं नैव देवराजस्य। यत्सुखमिहैव साधोर्लोकव्यापाररहितस्य ॥१॥”‘मा एयं अवमण्णंता’ अमाणोणाः

प्रतिषेधे, 'एतंति' एतं आरुहंतं मग्गं अवमण्णंता आत्मानमात्मना वहुं परिभविजह–लुंपह वहुं, को दृष्टान्तः ?,'एयस्स अमोक्खाए अयहारिव्व जूरथ' कथं ?, जेण तुब्भे वा 'पाणातिवादे वट्टंता' सिलोगो ॥२३२॥ स्यात्–कथं प्राणातिपाते वर्त्तामहे ?, येन पचनानि पाचनानि चानुज्ञातानि, उक्तंहि–पचंति दीक्षिता यत्र, पाचयंत्यथवा परैः। औद्दशिकं च भुंजंति, न स धर्म्मः सनातनः ॥१॥" मुसावादेवि असंजता संजतंति अप्पाणं भणध, अदत्तादाणे च जेसिं जीवाणं सरीराइं आहारेंति तेहिं अदत्ताइं आएह, धेनूनां वत्सवृद्ध्यै नियुंजितुं मेथुनेऽपि प्रेष्यगोपशुवर्गाणां, परिग्रहेऽपि धनधान्यग्रामादिपरिग्रहः, एवं कोधमाण जाव मिच्छादंसणसल्ले इति, एवं ताव शाक्याः अन्ये च तद्विधाः कुतीर्थाः, 'एवमेगे तु पासत्था' सिलोगो ॥२३३॥ एवमवधारणे 'एते' इति शाक्याः अन्ये च तद्विधाः, पार्श्वे तिष्ठन्तीति पार्श्वस्थाः, केषां ?–अहिंसादीनां गुणानां णाणादीण च सम्मद्दंसणस्स वा, किं ?–पण्णवेंति विसयणिग्घाते सुहेण सुहं, अथवा इमं पण्णवेंति दगसोयरियादयो, सुखलिम्भवो अजितेन्द्रिया 'इत्थीवसगता बाला जिणसासणपरम्मुहा' किं पण्णवेंति–विसयणिग्घातणे तु कज्जमाणे णत्थि अधम्मो अप्पणो परस्स वा सुखमुत्पादयतः, अप्पेवं धर्मो भवति, नत्वधर्मः, को दृष्टान्तः ?, 'जधा गंडं पिलागं वा' सिलोगो ॥२३४॥ जहा कोई अप्पणो परस्स वा गंडं पिलागं णिप्पीलेत्ता पुव्वं पूयं सोणितं वा णिस्सावेतित्ति को अधम्मो ?,एवं जो कोई इत्थिशरीरे शुक्रविषयनिर्घातं कुर्यात् तत्र को दोषः स्यात् ?, 'एवं विण्णवणीत्थीसु' एवमनेन प्रकारेण विज्ञापना नाम परिभोगः, एकार्थिकानि आसेवना, दोषः तत्र कुतः स्यात् ?, किंच 'जहा मन्धातइए णाम' सिलोगो ॥२३५॥ मंधातई णाम मेसो, सो जहा उदगं अकलुसेन्तो य जण्णुएहिं णिसीदितुं गोप्पएवि जलं अणदुआलेंतोवि पियति, एवमरागो चित्तं अकलुसेन्तो जइ इत्थिं विण्णवेति को तत्थ दोसो ?, उक्तं च–"प्राप्तानामु-

पभोगः शब्दस्पर्शरूपरसगन्धानाम्" किंच 'जहा विहंगमा पिंगा' सिलोगो ॥२३६॥ विहायसा गच्छंतीति विहंगमा, पिंगा पक्खिणी, आगासेण चरंती, उदगे अनिलीयमाना अविक्खोभयंती तं जलं चंचूए पिबति एवं विण्णवणित्थीसु, एवमरज्जमाणो यदि संप्राप्तान् भोगान् भुंजीत अत्र को दोषः ?, उत्तरदाणं–णणु तेसिं आसेवणा चेव संगकरणं, मेथुणभावं आसेवामित्ति, 'जह णाम मंडलग्गेण सीसं छेत्तूण कस्सई पुरिसो। अच्छेज्ज पराहुत्तो किं णाम तत्तो ण घेप्पेज्ज ? ॥ १ ॥ अथवा विसगंडूसं कोई घेत्तूण णाम उण्हिक्को। अण्णेण अदीसंतो किं नाम ततो णवि मरेज्जा ?॥२॥ जह वावि सिरिघरातो कोई रयणाणि णाम घेत्तूणं। अच्छेज्ज पराहुत्तो किं णाम ततो ण घेप्पेज्ज ? ॥३॥''एवं तु समणा एगे' सिलोगो ॥२३७॥ एवमनेन प्रकारेण, तु विसेसणे, नास्तीया, परे, एकेत्ति परेषामपि न सर्वे, एके, मिथ्यादृष्टयः अनार्या मिच्छादिट्ठीअणारिया, अथवा मिथ्यादृष्टित्वेऽपि कर्म्मभिरनार्याः, अज्झोववण्णा कामेहिं, दुविहेहिवि कामेहिं, दिट्ठंतो 'पूअणा इव तण्णए' पूयणा णाम उरणीया, तस्या अतीव तण्णगे छावके स्नेहः, ततो जिज्ञासुभिः कतरस्यां २ जातौ प्रियतराणि स्तन्यकानि ?, सर्वजनानां छावकानि अनुदके कूपे प्रक्षिप्तानि, ताश्च सर्वाः पशुजातयः कूपतटे स्थित्वा सच्छावकानां शब्दं श्रुत्वा रंभायमाणास्तिष्ठंति, नात्मानं कूपे मुंचति, तत्रैकया पूतनया आत्मा मुक्तः, त एवं पूतना इव तरुणे(ण्णए)मुच्छिता गिद्धा कामेसु 'अणागतमपासंता' सिलोगो ॥२३८॥ अनागतकाले किंपाकफलाहारवत् विषयदोषानपश्यन्तः 'पच्चुप्पण्णविसयगवेसणा' णाणाविहेहिं उवाएहिं विसयसुहं उप्पायंता 'ते पच्छा अणुसोयंति' ते इति अण्णउत्थिया परलोकं प्राप्ता अनुशोचंते देवदुर्गतौ यत्र वाऽन्यत्रोपपद्यंते, दृष्टान्तः 'खीणे आऊमि जोव्वणे' यथातिक्रान्तवयसः क्षीणेंद्रियशरीरबुद्धिबलपराक्रमाः नानाविधैः क्रीडाविशेषैः तरुणान्, वयमप्येवं क्रीडितवन्तः, तीव्रमनुशोचयन्ति,

एवं तेऽपि परलोकं प्राप्यानुशोचन्ति, इह च मरणकाले, न अस्माभिर्जितेन्द्रियत्वं भावितं वैराग्यं वा, उक्तं हि–'हतं मुष्टिभिराकाशं, तुषाणां कुट्टनं कृतम्। यन्मया प्राप्य मानुष्यं, सदर्थे नादरः कृतः॥१॥ उक्तं बहु चरित्रं च, स्वार्थश्च न प्रहावितः। ते चैवमन्वशोचन्त, यथा के?, उच्यते, 'जेहिं काले परिक्कंतं' सिलोगो ॥ २३९॥ जे इतिणा अणिद्दिट्ठणिद्देसे, कालो नाम तारुण्यं मध्यमं वयः, यौ वा यस्य कालो ध्यानस्याध्ययनस्य तपसो वा, तेषामेकेषां सुकृतं नाम श्रामण्यं, त एव च श्रमणाः त एव मोक्षाकांक्षिणस्त एव साधवो साधर्मिका वा 'ते धीरा बंधणुम्मुक्का' त एव धीराः त एव बंधविमुक्ता, बंधनं कलत्रादि कर्म्म वा, ये किं कुर्वन्ति?, 'जे णावकंखंति जीवितं' पुव्वतरपुव्वकीलितादि असंजमजीवितं न वांछंति। 'जहा णदी वेयरणी०' सिलोगो ॥२४०॥ 'यथे'ति येन प्रकारेण वेगेन तस्यां तरंतीति वेतरणी नाम परोक्षाः अवादिपुः सा हि तीक्ष्णश्रोतस्त्वात् विषमतटत्वाच्च दुःख-मुत्तीर्यते इति दुस्तरा, सर्वलोकप्रतीत एवासौ, पाखण्डिनां च केषांचित्, 'इहे'ति इह प्रवचने, वक्ष्यमाणमपि च 'जह तं णदी वेतरणी' दुत्तरा एवं लोगंसि नारीओवि दुत्तराओ, एवमनेन प्रकारेण सर्वोपसर्गेभ्योऽनुलोमेभ्यः प्रतिलोमेभ्यश्च दुस्तरतरा नार्यः; ता हि नानाविधैर्हावभावविलासैरुत्तितीर्षूनभिभवंति, वैतरण्यामिव तत्रैव तत्रैव निमज्जापयंति, ता हि दुक्खं द्रव्यभावतः परिहियंते, 'अमतीमय'त्ति न मतिमान् अमतिमान् तेनामतिमंता, 'जेहिं ते णारिसंजोगा' सिलोगो ॥ २४१॥ जे इत्यनिर्दिष्टनिर्देशः, त्रिविधा नार्यः, नारीभिः संयोगा नारीसंयोगाः, मैथुनसंसर्गा इत्यर्थः, 'पूयणा पिट्ठतो कत'त्ति पूयणा नाम वस्त्रान्नपानादिभिः स्नानाङ्गरागादिभिश्च शरीरपूजनात्, उक्तं हि-"णो सायासोक्खपडिबद्धे भवेज्जा", अथवा त एव नारीयोगाः पूतना पातयंति धर्म्मात् पातयंति वा चारित्रमिति पूतनाः, पूतीकुर्वन्नित्यर्थः, पृष्ठतो कृता नाम उज्झिता, 'सव्वमेवं णिराकिच्चा' सर्वमिति येऽन्ये उपसर्गाः

श्रीसूत्रकृ-ताङ्गचूर्णिः ॥१२५॥

क्षुत्पिपासासीतोष्णादयः निरा०नाम पृष्ठे कृत्वा, अथवाऽनुलोमाः प्रतिलोमाश्च, सोभणाए समाहिए ण उवसग्गेहिं खोहिज्जति, किं च 'एते ओहं तरिस्संति' सिलोगो ॥२४२॥ एते णाम जेहिं एते इत्थिपरीसहादयः उपसर्गा जिताः, द्रव्यौघः समुद्रः भावौघस्तु संसारः, तरिस्संति ते, नान्ये, न वा भावेन, दृष्टान्ते 'समुद्दं ववहारिणो' समुद्रतुल्यं समुद्रवत्, व्यवहरंतीति व्यवहारिणो–वणिजः पोतैस्तरंति, 'जत्थ पाणा विसण्णेसी' यस्मिन्–यत्र एते पाषण्डाः गृहस्थस्वभावं गताः विषयजिता विषण्णा आसंते गृहिणश्च, इह परत्र च 'किच्चंती सह कम्मुणा' कृत्यन्ते निपद्यंत इत्यर्थः, 'नं च भिक्खू परिण्णाय' सिलोगो ॥ २४३ ॥ दुविहाए परिण्णाए परिज्ञाय जाणणापरिण्णाए उवसग्गपरीसहे जाणित्ता पच्चक्खाणपरिण्णाए उट्ठितो ते अहियासेमाणु 'सुव्वते समिते चरे' समितिग्रहणात् उत्तरगुणा गृहीताः, मूलगुणा पुण इमे 'मुसावादं विवज्जेज्ज' कस्मान्मृषावादः पूर्वमुपदिष्टः? न प्राणातिपात इति, उच्यते, सत्यव्रतवतो हि व्रतानि भवंति, नासत्यव्रतो, अनृतिको हि प्रतिज्ञालोपमपि कुर्यात्, प्रतिज्ञालोपे च सति किं व्रताणामवशिष्टं?, तं मुसावादं विसेसेण वज्जए विवज्जए, अदिण्णादि च वोसिरे, अदिण्णमादि यस्याश्रवगणस्य सोऽयं अदिण्णाद्याश्रवगणः तं अदिन्नादि विवज्जए, तंजहा–पाणादिवादादि जाव परिग्रहं, प्राणातिपातप्रसिद्धये त्वपदिश्यते 'उड्ढे अहे तिरियं वा' सिलोगो ॥२४४॥ ऊर्ध्वमधस्तिर्यगिति क्षेत्रप्राणातिपातो गृहीतः, जे केई तसथावरा इति द्रव्यप्राणातिपातः''सव्वत्थे'ति प्राणातिपातभावश्च सर्वावस्थासु 'विज्जं' विद्वान् सर्वत्र विरतिं विद्वान् कुर्यात् इति वाक्यशेषः, विरति एव हि 'संति णिव्वाणमाहितं' विरतीउ वा विरतस्स वा संति णिव्वाणमाहितं, शान्तिरेव निर्वाणमाख्यातं संति णेव्वाणमाहितं, अहवा संतित्ति वा णिव्वाणंति वा मोक्खोत्ति वा कम्मखयोत्ति वा एगट्ठा, तेनापदिश्यते संति णिव्वाणमाहितं, उक्ता उपसर्गाः, ते च सर्वे एव सोढव्याः, आत्म-

ओघतरणादि

॥१२५॥

श्रीसूत्रकृताङ्गचूर्णिः स्त्रीप० अ० ४ ॥१२६॥

संचेतनीयोपसर्गापवादस्तु नोऽशरीरो धर्मो भवतीतिकृत्वा 'इमं च धम्ममायाय, कासवेण पवेदितं। कुज्जा भिक्खू गिलाणस्स, अगिलाए समाहिए ॥२४५॥ संखाय पेसलं धम्मं, दिट्ठिमं परिणिव्वुडे। उवसग्गे णिराकिच्चा, आमोक्खाए परिव्वएज्जासि ॥२४६॥ त्तिबेमि उपसर्गाध्ययनं समाप्तं ३॥ (ग्रन्थाग्रं ३०००)

इदाणिं इत्थिपरिण्णत्ति अज्झयणं, उवक्कमादि चत्तारि अणुयोगदारे परूवेऊणं अत्थाधियारो, सो दुविधो–अज्झयणत्थाधियारो उद्देसत्थाधियारो य, अज्झयणत्थाहियारो जाणणापरिण्णाए तिविधाउवि इत्थिगाउ जाणियव्वत्ति, पच्चक्खाणपरिण्णाए ताओ परिहरितव्वाओ, उद्देसत्थाधियारे इमा गाहा 'पढमे संथवसंलावाइएहिं' गाहा (५६) पढमे उद्देसए यथा–येन प्रकारेण संवाससंथवेण संबद्धवसधिमादीहि य दोसेहिं गमणागमणमादि पुच्छाहि य उल्लावसंलावभिण्णकथाहिं य इत्थीहिं सद्धिं सीलक्खलणं भवति, पढमुद्देसे विलंवणा उ लभति चोदिज्जंते, बितिए उद्देसए खलिंतो समणधम्माउ विलंवणा पाविज्जंति लिंगत्थओ होन्तो, स वा लिंगाओ अप्पं वा लिंगं वा सपक्खपरपक्खातो य हीलणं पावति। णामणिप्फण्णे णिक्खेवे इत्थि परिण्णा य दुपदं णाम, तत्थित्थीए 'दव्वाभिलावचिंधे'गाथा ॥५४॥ जाणगसरीर० भवियसरीर०, वतिरित्ता दुविधा–मूलगुणणिव्वत्तणाणिव्वत्तिया य उत्तरगुणनिवत्तणानिवित्तिया य, मूलगुणे इत्थिसरीरगं जढं जीवेणं, उत्तरगुणे कट्ठकम्मादिसु, अथवा दव्वित्थी तिविधा–एगभविया बद्धाऊ अभिमुहणामगोत्ता, अभिलावत्थी जहा साला माला वेला सिद्धी इत्यादि, वेदि(विंधि)त्थी अवगतवेतं इत्थिशरीरगं, तं पुण छउमत्थस्स केवलिस्स वा, वेदित्थी इत्थिवेदं वेयमाणी, भावित्थी आगमतो णोआगमतो य, आगमतो इत्थिवेदजाणओ तदुवउत्तो, (णोआगमतो) इत्थिवेदणामगोताइं कम्माइं वेयमाणो जीवो, इत्थि भणिया। इदाणिं परिण्णा, सा जहा

निक्षेपाः

॥१२६॥

अस्य पृष्ठे चतुर्थ अध्ययनं आरभ्यते

सत्थपरिण्णाए, जहा संजताणं इत्थिपरिण्णा तथा संजतीणं पुरिसपडिण्णा, इत्थीपडिपक्खो पुरिसो, तेण तस्सवि णिक्खेवो भाणितव्वो 'णामं ठवणा दविए'गाथा ॥५५॥ णामे जहा घडो पडो कलसो, ठवणापुरिसो कट्ठकम्मादिकता जिणपडिमा वासुदेवपडिमा एवमादि, दव्वे जाणगसरीरादि जहा इत्थी तथा भणियव्वं, खेत्ते जो जत्थ खेत्ते पुरिसो, जहा सोरट्ठो सावगो मागधो वा एवमादि, यस्य वा यत् क्षेत्रं प्राप्य पुंस्त्वं भवति, अन्यत्र न भवति, कालपुरुषोऽपि यावंतं कालं पुरुषो भवति, जहा "पुरिसे णं भदंते ! पुरिसोत्ति कालओ केवइ चिरं होंति ?, जहण्णेणं एगं समयं उक्कोसेणं सागरोवमसयपुहुत्तं" यो वा यस्मिन् काले पुरुषो भवति(जहा कोइ एगंमि पक्खे पुरिसो)एगम्मि पक्खे णपुंसगो, प्रजन्यते अनेनेति प्रजननं तद्यस्यास्ति, केवलमस्ति न पुंस्त्वं स प्रजननपुरुषः, कम्मपुरुसो नाम यो हि अतिपौरुषाणि कम्माणि करोति यथा वासुदेवः स कर्म्मपुरुषः, भोगपुरिसो चक्कवट्टी, गुणपुरिसो णाम यस्य पुरुषगुणा विद्यंते इमे, तद्यथा–व्यायामो विक्रमो वीर्यं, सत्त्वं च पौरुषा गुणाः। कान्तित्वं च मुदुत्वं वि(च)विधक(व)त्वं च योषितां ॥१॥ भावपुरिसो आगमतो णोआगमतो य,आगमतो पुरिसो पुरिसजाणगो तदुवउत्तो, णोआगमतो पुरिसणामगोताइं कम्माइं वेदयंतो, दस एते पुरिसणिक्खेवा इति। 'पढमे संथव' गाथा ॥ जेऽभिहिता पढमे संथवसंलावादिगेहिं पुव्वुत्तं। 'सूरा मो मण्णंता'गाथा ॥५७॥ सूरा मो मण्णंता इत्थिहिं अपडिविरतित्ति वाक्यशेषः, कैतवं नाम माया कैतवयुक्ताः कैतविकाः, उवधी नाम अन्येषां वशीकरणं,अधिका कृतिः निकृतिः नियट्टी तत्प्रयोगात् गहिता तु अभयपज्जोतकूआधारा(कूलवाला)दिणो [सूरो पज्जोतो केतवयारो तवस्सी] एवमादिणो जीवा इत्थिदोसेण इह परभवे य णाणाविधाइं दुक्खाइं पावंति हत्थपायछेदादीणि, 'तम्हा ण उ वीसंभो गंतवो णिच्चमेव इत्थीणं। पढमुद्देसे भणिता जे दोसा ते गणंतेणं ॥५८॥ सुसमत्थाविऽसम-

अस्य पृष्ठे चतुर्थ अध्ययनस्य प्रथम उद्देशक: आरभ्यते

त्था कीरंति अप्पसत्तिया पुरिसा। धर्मं प्रत्यसमर्थो, अपसत्तिया नाम परीसहभीरुणो, 'दिस्संति सूरवादी णारीवसगा ण ते सूरा ॥५९॥ रणसूरवादिणोऽवि णारीवसगा दीसंति जहा ते पज्जोदादयो, को पुण सूरो ?, उच्यते–धम्ममि जो दढमई सो सूरो सत्तिओ य वीरो य। ण हु धम्मि णिरुच्छाहो पुरिसो सूरो सुबलिओवि ॥६०॥ जो धम्ममि दढो सूरो सत्तिगो य,ण उ जो धम्मणिरुत्थाहो धर्मं प्रति सूरो भवति, यद्यपि बलवानसौ सरीरेण तथाप्यसौ दुर्बल एव, एते चेव य दोसा पुरिसपमादेऽवि इत्थिगाणंपि। तम्हा उ अप्पमादो विरग्गमग्गंमि तासिंपि ॥६१॥ पुरिसोत्तरिओ धम्मोत्तिकाउं तेण इत्थीपरिण्णा वुत्ता, इत्थीणवि एसा चेव विवरीता पुरिसपरिण्णा, गयो णामणिप्फण्णो। सुत्ताणुगमे सुत्तमुच्चरियव्वं अखलितादि जाव पंचधा वित्तिलक्षणमिति, सुत्तस्स सुत्तेण संबंधो–'आमोक्खाय परिव्वएज्जासि'त्ति पडिलोमे उवसग्गे अधियासेन्तो 'इमे'इत्यन्ये अनुलोमाः, उपोद्घात एव तस्योपदिश्यते–पूर्वं प्रव्रजति पश्चादुपसर्गान् सहतीतोऽपदिश्यते 'ये मातरं च पितरं च' वृत्तं ॥२४७॥ 'ये' इति अणिद्दिट्ठणिद्देसो चशब्दोऽधिकवचनादिषु, भ्रातरं भगिनीत्यादि, विविधं प्रधाय विप्रधाय तृणमिव पटांतलग्नं, पूर्वसंयोगो गृहसंयोगः, अथवा जातः सन् यैः पश्चात्सह संयुज्यते स संयोगः, स तु भार्याश्च पुत्रदुहित्रादि, अथवा सर्व एव पूर्वापरसहसंबंधः पूर्वसंयोगो भवति, अथवा द्रव्यभावतः पूर्वसंयोगो, द्रव्ये स्वजनसंथवो नोस्वजनसंस्तवश्च, स्वजने पूर्वापरसंस्तवः, नोस्वजनसंस्तवस्त्रिविधः–सचित्तादि, सचित्ते दुपदचतुष्पदापदं,द्विपदे दासीदासभृत्यमित्रवर्गादि, चतुष्पदे हस्तिअश्वगोमहिष्यादि, अपदे आरामोद्यानपुष्पपालादि,अचित्ते हिरण्णादि मिश्रे साधारणालंकारप्रहरणहस्त्यश्वादि, भावे मिच्छत्ताविरतिअण्णाणा 'एगे सहिते चरिस्सामि' एगो णाम रागदोसरहितो, सहितो णाणादीहि, आत्मनो वा हितः स्वहितः, चरति–गच्छति वर्तयतेत्ति एकोऽर्थः, विविक्तान्येपतीति विवित्तेसी

मार्गयतीत्यर्थः विविक्तानां साधूनां मार्गमेषतीति विविक्तैषी, आरतमेहुणो नाम उपरतमैथुनः, कतर आरतः ? 'विवित्तेसी' विवित्तं द्रव्ये शून्याकारं स्त्रीपशुवर्जितं भावे तत्संकल्पवर्जनता, अथवा कर्मविवित्तो मोक्खो तमेवमेषतीति विवित्तमेसी,'सुहुमेणं तं परक्कम्मं' वृत्तं ॥२४८॥ सुहुमेनेति–निपुणेन, उच्यते येनेति वाक्यशेषः,'परक्कम्म'त्ति पराक्रम्य अभ्यासमेत्य वंदणपूर्वकेन सूक्ष्मेनोपायेन 'छन्नपदेने'ति अन्यापदेशेन, पुत्तकिडगा य णत्तुयभातीकिडगा य पीतकिडगा य। एते जोव्वणकीडगा पच्छन्नपती महिलियाणं ॥१॥ अथवा 'छन्नपदेने'ति छन्नतरैरभिधानैराकारैश्चेमं अभिमर्षति, तद्यथा 'काले प्रसुप्तस्य जनार्दनस्य, मेहांधकारासु च सर्वरीषु। मिथ्या न भाषामि विशालनेत्रे !, ते प्रत्यया ये प्रथमाक्षरेषु ॥१॥ जाणंति ता उवायं च, उपायो नाम विविक्तविश्रंभरसो हि कामः, स तु एको आत्मद्वितीयो वा, गच्छगतस्य किं करिष्यति ?, तस्यैव देशकालं छकं(न्नं)च 'जह लिस्संति'त्ति येन प्रकारेण लिश्यन्ते संबध्यंत इत्यर्थः, एके, न सर्वे, अन्ये हि स्त्रीजनालिङ्गिताः अपि न तामिः संबध्यंते, पवनबलसमीरिता वह्निज्वाला इव चैनां मन्यन्ते, ते तूपाया इमे—यथा यथा ह्यग्निः सन्निकृष्टो भवति तथा तथा दहति, इत्येवं मत्वा 'पासे भिसं णिसीयंति' वृत्तं ॥२४९॥ भृशं नाम अत्यर्थं, प्रकर्षेण उरुणा ऊरूं अक्कमिया, दूरगता हि नातिस्नेहमुत्पादयन्ति विश्रंभदा, तेण अद्धासणे णिसीदंति, सन्निकृष्टा वा परिभुंजमाणा पुसा पुष्यन्तेऽनेनेति पोषकं तन्निमित्तं वा कामिभिर्वस्त्रान्नपानादिभिः पुष्यत इति पोषकं–पोसं, वत्थं णाम णिवसणं, तमभीक्ष्णं अभीक्ष्णमायासबद्धमपि शिथिलीकृत्वा परिहिति, णिविट्ठा उट्ठित्ताउ य आसन्नगताउ य होइऊण 'कायं अधिविदंसेन्ति' जंघा दुन्निवि हुद्धक्खणे वा जणणेण ट्ठिता वा संती णिवेयंति गुह्यमिति प्रकाश्य पुनर्बालमवेति, बाहु उद्धट्टु नाम उत्सृज्य कक्षां परामृशति, एवमादीनि अन्यान्यपि भ्रूकटाक्षविक्षेपादीनाकारान् करोति,

किं च–'सयणासणेहि जोगे' वृत्तं ॥५०॥ तमेकाकिनं व्याकुलसखायं वा मत्वा सयणे णिमंतेति, सयणं णाम उवस्सयो, सीतं इदाणिं, साहु अंतो, अतीवगिम्हे वा मत्वा सयणे णिमंतेति, धूलिं वा कतवरं वा उवसग्गाउ णीणेंति, अण्णतरं वा संमज्जणवरिसीयणाति उवसग्गपरक्कमं करेंति, 'आसणेणं'ति पीढएण वा कट्ठमएण वा आसंदएण णिमंतेति, 'योग्य'मिति यस्मिन् काले हितं निवातं प्रवातं वा स्यात्, किमासां भिक्षुणा प्रयोजनं? नन्वासामन्ये कामतंत्रविदः तत्प्रयोजननिश्च गृहस्था विद्यन्ते, उच्यते हि कुयोषितो विधवा विप्रवसितधवाः, तासां हि विरूपोऽपि तावद्वयोस्थोऽतिकाम्यो भवति, दुर्मुखोऽप्यर्थार्थिकोऽपि एकान्तरुचिरपि, किमु यः सरलः सुरूपो विचक्षणः, उक्तं हि–"माधुर्यं प्रमदाजने च ललितं०" ता हि सन्निरुद्धाः सधवा विधवा वा, आसन्नगतो हि निरुद्धाभिः कुब्जोऽन्धोऽपि च काम्यते, किमु यो स कोविदः, उक्तं हि—"अंबं वा निंबं वा अभ्यासगुणेण आरुभति वल्लीं।" दूरस्थं चैनं मत्वा ब्रूयात्–अम्हे हि ण सक्केमो सकम्मा दिणओ वंदितुं णमंसितुं वा, इमाणि अम्ह सयणाणि वा, अथवा योग्यग्रहणात् उच्चारपासवणचंकमणत्थाणज्झाणओयणभूमीओ घेप्पंति, सा जइ कदाइ सड्ढी भवेज्जा जाणइ जाइं साधुजोगाइं 'इत्थी एगता णिमंतेंति' एकस्मिन् काले एकदा, यदा यदा स एकाकी भवति व्याकुलसखायो वा, अथवा वरिसारत्तादिसु जत्थ सयणासणोवयोगो भवति, सयणमिति संथारगो घेप्पति, उवस्सओवि,'एताणि चेव से जाणे पासा उ विरूवरूवाइं' एतानीति यान्युपदिष्टानि शयनासननिमन्त्रणानि स भिक्षुः पासयंतीति पासा त एव हि पासा दुच्छेद्याः, न केवलं हावभावभ्रूविभ्रमेंगितादयः, न हि शक्यमुल्लंघयितुं, न तु ये दानमानसत्कारा: शक्यन्ते छेत्तुं, उक्तं हि–"जं इच्छसि घेतुं जे पुव्विं ते आमिसेण गिण्हाहि। आमिसपासणिबद्धो काही कज्जं अकज्जंपि ॥१॥" 'विविधरूवाइं' ताइं पुण पासाणि विरूवरूवाणि, संवधनउपगूहनआलिंगना-

श्रीसूत्रकृताङ्गचूर्णिः ॥१३१॥

दीणि, जहा ताणि परिहरणीयाणि तथा तब्भयादेव सयणासणणिमंतणादीणि परिहरितव्वाणि, ताणि पुण कहं परिहरितव्वाणि ?, उच्यते 'णो तासि चक्खु संधेज्जा' सिलोगो ॥२५१॥ चक्षुसंधणं णाम दिट्ठिए दिट्ठिसमागमो, अकुट्ठउ विकट्ठओवि य तासु णिचं भवेज्जा, कार्येऽपि सति अस्निग्धया दृष्ट्या अस्थिरया अवज्ञया चैतां ईषन्निरीक्षते, 'साहस'मिति परदारगमनं, नह्यसाहसिकस्तत्करोति, संग्रामावतरणवत्, तत्र हि सद्यो मरणमपि, स्यात् हस्तादिछेदबंधघातो वा, स्वदारमपि तावदीक्षितस्य साहसं, किमु परदारगमनं ?, अथवा साहसं-मरणं, प्राणान्तिकेऽपि न कुर्यात्, अथवा यदसौ स्त्री चापल्यात् साहसं कुर्यात्तदस्या न समनुजानीयात्, उक्तं हि-"पुरुषे विद्यते सत्त्व"मिति, 'न सज्झियंपि विहरेज्जा नेति प्रतिषेधे,'सज्झियं'ति ताहिं सह, गामाणुगामं ण विहरेज्ज, जत्थ वा ताओ ठाणे अच्छंति तत्थ ण चिट्ठितव्वं, कयाइ पुव्विं ठितस्स झत्ति एज्जा ततो णिग्गंतव्वं, क्षणमात्रमपि न संवस्याः, 'एवमप्पा रक्खितु सेउ'त्ति आत्मेति सरीरमात्मा च, स इह परे च लोके अतिरक्षितो भवति, ये इह मैथुनानाचारदोषास्तस्य न भविष्यंतीत्यतो निरीक्षितो भवति, पुनरिदानीं पाशाः 'आमंतिय ओसवियं वा' वृत्तं ॥२५२॥ काचित् सन्निकृष्टगृहवासीनी सेज्जायरी प्रातिवेशिकी वा अहनि विरहाद्यलंभात् ब्रूयाद्-अहं निश्यागमिष्यामि, नास्ति मेऽहनि क्षणो विरहो वा, तद् अस्या न समनुज्ञाणीयात्, धर्म्मं श्रोतुमितरप्रयोगेन वा, यदि चेत् मम भर्तुः शंकसे तत एनमहं आमन्त्र्य नाम पुच्छिउं तत्प्रयोजना वसितं स्थापयित्वा, अथवा ब्रूयात्-असावहनि कृष्यादि कर्मपरिश्रान्तः भुक्तः सन् निपन्नमात्र एव मृतवच्छेते, भद्रक एवासौ, न मम रुस्सिहितित्ति, जइवि मं परपुरिसेण सह गच्छमाणिं पेच्छति तहावि नवि रूसेज्जा, अथवा संकेतेत, ननु ते भर्त्ता न विरूप्येत ?, सा ब्रवीति-आमंतिय ओसवियाणं, आमंतिय ओसविया च तमहमागता, तुब्भे वीसत्था होह, विविक्तविश्रंभरसो हि

दृष्टिपरिहारादि

॥१३१॥

श्रीसूत्रकृताङ्गचूर्णिः ॥१३२॥

कामः, यच्च पृच्छसि किमागताऽसि अकाले इति? तं धर्म्मं श्रोतुं, ब्रूयाद्वा ममाऽऽणत्तियं देह यन्मया कर्त्तव्यमिति, शुश्रूषापादशौचम्रक्षणादि, यद्वा किंचिदसद्गृहेऽस्ति तत्सर्वमहं च भवत्संतकं 'आयसा' नाम आत्मसा, अप्पाणंवि णिमंतेति तुब्भं चयं इमं शरीरगं, अहं ते चलणोवधानकारिया, एवं भिन्नकहादीहिं सम्बन्धः, सम्बधनालिङ्गनउपगूहनकंठवलंबणादीणि वा कुर्वती निवारिता ब्रूयात्–'कुत्र वा ममान्यत्रोवयोगो,'एतानि चेव से जाणि सद्दाणि' एतानीति यान्युद्दिष्टानि 'से' इति स भिक्षुः, शब्दा नाम ये शब्दादिविषयाः कथिता, न केवलं गीतातो शब्दा वर्जा, आत्मनिमन्त्रणादयो हि सुदुस्तराः शब्दाः, अथवा यानि सीत्कारादीनि सद्दाणि कज्जंति तान्येवैतानि विद्धि निमन्त्रणादीणि शब्दानि, पढंति च–'सद्दाणि विरूवरूवानि' तासु हि पंचलक्खणा विसया संति विभासियव्वा; विविधं विसिट्ठं वा रूवं, विरूवाणि रूवाणि जेसिं ताणिमाणि विरूवरूवाणि–'णाह पिय कंत सामिय दइत वसुल होलगोल! गुणलेहि। जेणं जियामि तुब्भं पभवसि तं मे सरीरस्स ॥१॥ इमानि चान्यानि शब्दानि 'मणबंधणेहि णे' वृत्तं ॥२५३॥ मनसो बंधनानि मनोबंधनानि, तानि तु गतयश्च निरन्तरा रूवमंदा यस्मिन् करुणमाकारतो वाक्यतश्च, विनीतवत् वन्दनपूजनं पादादिसंबाधनं 'उपकत्ता' अल्लिइत्ता 'अदु मंजुलाइं भासंति' मणसि लीयते मनोऽनुकूलं वा मंजुलं, मदनीयं वा मंजुलं, मितमधुररिहितजंपुल्लएहि ईसी कडक्खहसितेहिं। सविकारेहि विरागं हितयं पिहितं मयच्छीए ॥ १ ॥ भेदकरी कथा भिण्णकहा, तंजहा–तुमंसि किं वत्तवीवाहो पव्वइतो ण वत्ति, वृत्तवीवाह इति चेत् कथं सा जीवति त्वया विनैवंविधरूपेनेति, कुमार इति चेत्, अनपत्यस्य लोका न संति, किं ते तरुणगस्स पव्वज्जाए?, दारिका वरिज्जसु, मया वा सह भुंज भोए, स्यात्कथं वैराग्यं वा? कामभोगपरंपराज्ञः, भुक्तभोगः कुमारगो वा तत्प्रयोजनात्यन्तपरोक्षः आनम्यते, कथं? 'सीहं जहा व कुणिमेणं' वृत्तं ॥२५४॥

शरीरार्पणादि

॥१३२॥

येन प्रकारेण यथा सहस्रिकोऽपि स्कन्धावारः सिंहेनैकेन भज्यते, क्वचिच्च पन्थाः सिंहेन दुर्गाश्रयेण निःसंचरः कृतः, स च तद्व-
हणोपायविद्भिः पुरुषैः छगलकं मारयित्वा तद्गोचरे निक्षिप्य पाशं च दद्यात्, तेन कुणिमकेन बध्यते, एकचारी नाम एक एवासौ
चरति, न तस्य सहायकृत्यमस्ति, उक्तं हि–‘न सिंहवृन्दं भुवि दृष्टपूर्वं’‘एवेत्थिया बंधंति’ भाववंधेन, द्रव्यसंवृत्तो हि समुद्र-
कूर्मो, पिहिता आश्रवा यस्य भावतः, स तु संवृत्तः भावैकचरः, द्रव्यतो भाज्याः, पाशाः कूटादयः, भावपाशास्त्विमे–गतिविभ्रमे-
र्गिताकारहास्यादयः, यैर्भावो दृश्यते, संवृतोऽपि तावद्बध्यते,किन्तु योऽल्पवृत्तिरिति,‘अह तत्थ पुणो नमयंति’सिलोगो॥२५५॥
तस्मिन्निति तत्र, मूर्च्छित इति वाक्यशेषः, असंजमनतं पुनरनेकैरुपायैर्नमयन्ति यद्यदिच्छंति तत्कारयन्ति, यथा रथकारः नेमिकाष्ठं
तक्षन् क्रमशो, यदि स एवं नतः ‘बद्धे मिए व पासेण’ यथाऽसौ मृगः पाशेन बद्धः मुमुक्षुः स्पन्दमानोऽपि न मुच्यते एवम-
सावपि विषयदानैर्बद्धः कुकुटुम्बकुतश्चीहिं व्याप्रियमाणोऽपि पुनर्विजिहीर्षुरपि न शक्नोत्यवसर्पितुं क्रव्यगृद्ध इव सिंहः, भावगार्द्ध्यं,
कुकुटुम्बव्यापारैः कृष्यादिभिः व्याप्तः, कर्म्मभर्च्छिताः ‘अह सऽनुतप्पती पच्छा’ वृत्तं ॥ २५६ ॥ यथा कश्चिज्जनो जानन्
अजानन् वा विषमिश्रं पायसं भुक्त्वा तत्परिणामे वेदनोदये भृशमनुशोचते,‘एवं विवागमणिस्सा’ एवमिति योऽयमुक्तः विवागो
दारभरणादिपरिक्लेशः, विवेग इति चेत् भवति विवेच्यते येन भवः कर्म वा स विवेगः–संयमः एवं विवेगमातात, स्त्रीभिः संगमो
न कार्यः, काष्ठकर्मादिस्त्रीभिरपि तावत्संवासो न कल्पते, किमु सचेतनाभिः ?, दविओ नाम रागदोसरहितो, एगतो वासः संवासः
तदासणे वा संवसतो संथवसंलावादि, दोसा असुभभावदर्शनं भिन्नकथा वा स्यात् , उक्तं हि–‘तदिन्द्रियालोचनसक्तद्रव्याः०’‘तम्हा
उ वज्जए इत्थी’ वृत्तं ॥२५७॥ तस्मात्कारणात् इत्थी तिविधा, कथं वज्जए ? ‘विसलित्तं कण्टगं णच्चा’ विषेण दिग्धो विष-

दिग्धः आगंतुना सहजेन वा, अविपदग्धोऽपि तावत् परिहियते, किं पुनः सविष इति, स तु मरणभयात् परिहियते, स्त्रियस्तु संयममरणभयात्, किंच-'ओये कुलाणि वसवत्ति' ओयो णाम रागदोसरहितो, वसे वर्त्तत इति वशवर्त्तीति, पूर्वाध्युषित्वात् यदुच्यते तत्कुर्वन्ति ददति वा, स्त्रियो वा येषां वशे वर्तन्ते, किं पुनः स्वैरस्त्रीजनेषु, वश्येन्द्रियो वा यः स वशवर्ती, गुरूणां वा वशे वर्त्तते इति वशवर्ती, आघाति नाम आख्याति गत्वा २ धर्म्मं निष्केवलानां स्त्रीणां असहितानां पुंसां, असावपि तावन्न निर्ग्रन्थो भवति, किमु यस्ता भिन्नकथं कथयति ?, यदा पुनर्बद्धा सहागता पुरुषमिश्रा वा वृन्देन वा गच्छेयुः तदा स्त्रीनिन्दां विषयजुगुप्सां अन्यतरं वा वैराग्यकथं कथयति, कदाचिद् ब्रूयात्-यदिवा गृहमागंतुं न कथयसि तो भिक्खपाणगादिकारणेणं एज्जह, दृष्टिविश्रामनामपि तावच्चां दृष्ट्वा करिष्यामः, अपश्यंत्या हि मे त्वां शून्यमेव हृदयं भवति, एवमुक्त्वा वा 'जे एवं इच्छं अणुगिद्धा' वृत्तं ॥ २५८ ॥ जे इति अणिद्दिट्ठणिद्देसो, एतदिति यदुक्तं गिहिणिसेज्जे, जे वा एवंविधाणि इच्छंति गवेसंतेत्यर्थः, अणुप्रयायंते, एतदपि तावद्भवतु यदि रहो नास्ति समागमो वा, 'अण्णयरा उ ते कुसीलाणं' पासत्थादीणं कुत्सितसीला कुशीला पासत्थादयः पंच णव वा, पंचत्ति स पासत्थउसण्णकुसीलसंसत्तअहछंदा, णवत्ति एते य पंच इमे य चत्तारि-कायिकः मामकः प्राश्निकः संप्रासारिकः, स्त्रीसमागमाद्वा को दोषः ?, उच्यते, 'सुतवस्सिएवि भिक्खू' अथवा अन्यतरो वा भवति कुशीलानां सुष्ठु तपस्विनः सुतपस्विनः योऽपि ताव तपोनिष्टप्तविग्रहः स्यात् मासोपवासी वा द्विमासोपवासी वा अथवा श्रुतमाश्रृतः सुतमहिज्जंतो गणी वायगो वा, नो प्रतिषेधः, विहारो नाम नक्तं दिवा वा शून्यागारादि पइरिक्कजणे वा स्वगृहे 'सहणं'ति देसीभासा सहेत्यर्थः, एवं ज्ञात्वा स्त्रीसंबद्धा वसधी वर्ज्या, कूटचारो दृष्टान्तः, कतरा स्त्रियो वर्जा ?, उच्यते, असंकनीया अपि तावद्वर्जाः, किमु शङ्क-

नीयाः, तद्यथा-'अवि धूअराहिं सुण्हाहिं' सिलोगो ॥ २५९ ॥ अवि विसेसणे धूयरो पुत्तिया ताहिं, पुत्तबहुणो सुण्हा, जइ नाम सुण्हा, धीयत इति धाती, दासीग्रहणं व्यापारक्लेशोवतप्ताः दास्योऽपि वर्ज्याः, किमुत स्वतन्त्रा स्वैरसुखोद्यता,'महल्लीहि वा कुमारीहिं' महल्ली वयोऽतिक्रान्ताः वृद्धाः, कुमारी हि अप्राप्तवयसा भद्रकन्यकाः, संथवो उल्लावसमुल्लावहास्यकन्दर्पक्रीडादि, मातृभिर्भगिनीभिश्च, नरस्यासंभवो भवेत् । बलवानिन्द्रियग्रामः, पण्डितोऽप्यत्र मुह्यति ॥ १ ॥ स्यात्किमत्र ?, 'अउ णातीणं च सुहीणं च'वृत्तं ॥२६०॥ अदुरिति अथवा णातीणं वा णातयो णाम कुलघरे वसंतीए पितृभ्रात्रादयः, अथवा स्त्री येषां दीयते त एव तस्याः सगोत्रा भवन्ति ज्ञातकाश्च, सुहिणो णाम जे सन्नायका मित्राः, तेषामप्रियं भवति, यद्यपि प्रतिषेधयंति 'एकदा' कदाचित्, उभ्रामिकेयं उक्ता वा ब्रूयात्-एष पुत्रमस्तको यथा, नैतत्सत्यं, सा च तस्मिन्नर एवातिमूर्च्छिता ब्रूयात्-मा मे पुनरेवं वक्ष्यसि, गिद्धत्ति पासत्ति वा मुच्छिएत्ति वा एगट्ठा, ब्रूयादिति वाक्यशेषः, ब्रूयात् अहो इमीसे वयं रक्खपोसणे करेमो, इमो पुण सेसमणुओ मणुस्सकज्जं करेइ, भणिज्ज वा-हे खमण ! इमीसे रक्खणपोसणं करेहि, त्वमेवास्या मनुष्यः इति, एस तुमे सद्धिं दिवसं उल्लाविंती अच्छइ, अयमपरः कल्पः-हे खमण ! रक्खणपोसणे मणुस्सो भवति, न कहाहिं, किंच—अन्येनाप्युदरे कृते दंडायाः सोऽपदिश्यते-तत्त्वमेवास्या रक्षणपोषणं कुरु, मनुष्योऽसि, राउले च ते कड्ढामो, अथवा भणेज्ज-हे साधु ! एसा अम्हच्चिया गिद्धा सत्ता तुमंसि अम्हे णो आढाति णो परिजाणति, नरकस्त्वं, एनां रक्षणेन पोषणस्त्वमेणां, पोषणेन मनुष्यस्त्वमस्याः, किंच-'समणंपि दट्ठुदासीणं' वृत्तं ॥ २६१ ॥ कदाचिदसौ तस्मिन् रूपवति साधौ गृद्धा स्वरसौष्ठवोपेते वा गृद्धा तच्चित्ता तम्मणा अच्छेज्ज, अभिक्खणं वा अभिक्खणं तम्मि तेण दीसेज्ज पडिचोदिज्जंति वा अच्छीयमाणी, तथैवाह-सयणं दट्ठुदासीणं,

एकान्त-विषमता

तमपि तथैव तच्चित्तं तन्मणं स्वाध्यायध्यानप्रत्युपेक्षणादिसंयमकरणोदासीणं तिष्ठन्तं दृष्ट्वा जानानाश्च यथैपोऽस्याः निमित्तेन संयम-करणोदासीणो चिट्ठति, तत्थवि ताव एगे कुप्पंति, भणंति वा–किमेवं अज्ज लक्खसि?, अन्यथा च पठ्यते 'समणंपि दट्ठु-दासीणिं उदासीणी णाम येषामप्यसौ भार्या न भवति, बान्धवीया अपि पदार्थादिषु तां च पोषितुं, किमु यस्यासौ भार्या बान्धवी वा तामगणयंती, अथवा 'उदासीन'मिति उदासीनमपि भावात् श्रमणं दृष्ट्वा स्त्रीसहगतं एके कुप्यंते, किमु सविकारप्रा-यमिति, 'अदु भोयणेहिं णत्थेहिं' न्यस्तानि–उपनीतानि उपेत्य नीतानीत्यर्थः, न गृहिणो, तस्स हत्थाओ वा, सो य धणग-समणगो गिहिणीसेज्जवाही वा भिक्खाए आगतो, अथवा न्यस्तमिति तद्गतमनसं दट्ठुं कूरो दत्तो न तावद् व्यञ्जनं, स वाऽऽगतः स तत्रातिसंभ्रमेणातुरीभूता सावातकस्यान्यस्य वा दातव्यं तं न प्रयच्छति, अन्यस्मिँश्च दातव्ये कर्त्तव्ये वा अन्यत्प्रयच्छति करोति वा, निदर्शनं जहा–कहिंचि गामे पदोसे णट्ठे णट्ठेण तालिते मद्दले काइ वधू ससुरादीए परिवेसंती भायणेसु दिण्णेसु कूरमानेति, ताए य तण्डुला इतिकाऊण राइआउ अवस्सीयाउ, ततो णाए कूरोत्तिकाउं ससुरस्स उक्किण्णाउ, सो य आणक्खेतुं तुसिणीओ, महत्थिया संचिट्ठति, पतिणा से अस्सादेतुं पिट्ठिता, एवं तंपि साधुणिमित्तं संभंतं दट्ठूण गृहिषु आत्मसु वा नादृतां तस्याः भोत-काया इत्थीदोससंकिणो भवंति, इत्थीदोसो णाम व्यभिचारिणी, स्यादेवंविधाः अपि दोषाः कस्यचित् दृष्टा अभूवन् भवन्ति वा?, ओमित्युच्यते, 'कुव्वंति संथवं ताहिं' वृत्तं ॥२६२॥ संथवो णाम गमणागमणदाणसंप्रयोगप्रेषणादिपरिचयः,'ताभि'-रिति ताभिः स्त्रीभिः, पब्भट्ठा णाम णाणदंसणचरित्तजोगेहिं, जओ एते दोसा 'तम्हा समणा उ जहाहि' तस्मात् कारणात् श्रमण इत्यामन्त्रणं अथवा श्रमणस्त्वं किं तवैवंविधैर्व्यापारैः?, एते गार्हस्थानामेव युज्यंते, तुर्विशेषणे, जहाहि, पठ्यते च 'तम्हा

समणा ण समिन्ति आतहिओ' न इति प्रतिषेधे, समिति समन्तात्, न समग्रमित्यर्थः, अथवा ण समेन्ति—ण समुपागच्छंति, आत्मने हितं आत्महितं आत्मनि वा हितं आत्महितं, तासिपि अविरतियाणं तं हितं इह परलोगे य, सण्णिसेज्जा णाम गिहिसेज्जा संथवसंकथाओ य, स्यात् प्रव्रज्यामुपेत्यापि एवं कुर्यात् ?, ओमित्युच्यते,'बहवे गिहाणि अवहट्टु' वृत्तं ॥२६३॥ प्रभृताः अपहृत्यापहृत्य उत्सृज्येत्यर्थः, दव्वलिंगेण समणावि 'मिस्सीभावपण्हया' मिश्रीभावो नाम द्रव्यलिङ्गमिति, न तु भावः, अथवा पव्वज्जाए गिहवासेऽवि पण्हता णाम गौरिव प्रस्नुता एवमेषां, कर्मभयाद्वा मिश्रीभावः, प्रियतत्त्वे कतरः पक्षः ?, विसयसायासोक्खपडिबंधेणं भणंति—लिंगछेयणमेव, अवधाणं चिरं, पण्होमित्तावि कंखामोहणिज्जकम्मदोसेण कयाइ अधेसत्तमीओ अबंधेज्ज इति, अण्णे पुण अट्टदुहट्टवसट्टा असमाधिगता त एवं पंडितत्तणेण धुवमग्गमेव भासिंसु, धुवमग्गो णाम संजमो वेरग्गमग्गो वा, तंजहा—बहुमोहेनि णं पुव्वं विहरित्ता अह पच्छा संवुडे कालं करेज्जा आराधए भवति, तं तेसिं वायावीरियमेव, केवलं ढक्करिपुत्तणं, न तु करणवीरियं, उक्तं हि—'जो जत्थ होति भग्गो ओवासं०'गाथा, वायावीरियं णाम जो भणति ण य करेति भिल्लगजकुनवत्, अथवेदं वायावीरियं 'शुद्धं रवति परिसाए' वृत्तं ॥२६४॥ सुद्धमिति वेरग्गं, अथवा शुद्धमिति शुद्धमात्मानं, ततः पूजासत्कारहेतोः परिषदि रौति—भाषत इत्यर्थः, 'अथ रहस्संमि दुक्कडं करेंति'त्ति एवमुक्त्वा रहस्संमि दुक्कडं करेइत्ति, दुक्कडं णाम पावं, अथवा दुक्खं तल्लिङ्गस्थैः क्रियत इति दुक्कडं, किंच 'जाणंति य णं तहावेया' स हि जाणीते—स मां कश्चित् जानाति, अथ चैनं तथावेदा जाणंति, तथा वेदयंतीति तथावेदाः, कामनच्चविद इत्यर्थः, ते हि कामयमानं आकारविकारैर्जानंति, उक्तं हि—"अकामिनां कामविघातुराणि, तनूनि गात्राणि च कामुकानां।" नखदशनच्छेदनैर्वा सूच्यन्ते यथैतेऽकृत्यकारिणः, यथा-

ऽध उच्चाराद्युत्सृजन् दृश्यमानोऽपि परैर्मन्यते न मां कश्चित्पश्यति एवमसावपि रागद्वेषान्धो जानीते न मां कश्चित्पश्यति, ज्ञायते च परीत्रजन्, जलभृतवत्, अथवा यो यथावस्थितो भावतः तं तथावेदाः–प्रत्यक्षज्ञानिनः, ते हि आवीकम्मं रहोकम्मं सव्वं जाणंति, ये पुनस्ते तद्विधाः ते ब्रुवते–अहो इमो माइल्लो महासढो जो णाम इच्छति अम्हेवि पत्तियावेतुं,'णवि लोणं लोणिज्जति ण य तोपिज्जइ घयं च तेल्लं वा। किह सक्का वंचेतुं अत्ता अणुहूयकल्लाणी? ॥१॥ 'सयदुक्करं अवदते' वृत्तं ॥२६५॥ एवं तावदसौ स्वयं दुक्कडकारिणं आत्मानं न वदति यथाऽहं दुक्कडकारीति, जोऽवि य गूहायारं प्रवचनवात्सल्यात् तद्धितमिच्छन्वा चोदयति तत्थवि णिण्हवति, आकुट्टो नाम चोदितः आघातः अभिशास्तो वा, कत्थ श्लाघायां, भृशं कत्थयति श्लाघत्यात्मानमित्यर्थः, अहं नाम अमुगकुलपसूतो अमुगो वा होंतओ एवं करेस्सामि?, येन मया कनकलता इव वातेरिता मदनविसविकंपमाना भार्या परित्यक्ता सोऽहं पुनरेवं करिष्यामि?, "यदि संभाव्यपापोऽहमपापेनापि किं मया?। निर्विषस्यापि सर्पस्य, भृशमुद्विजते जनः ॥ १ ॥" अपापे ब्रूयाद्वा–को ब्रवीति? यथाऽहमेवंकारीति, स भावेन च ह्येवंकारी, उक्तं हि–"स्तेनानुमानेन परं मनुष्याः०" राउले वा णं कड्डामि,'वेदाणुवीयी कामासि' वेदः वेद इव वेदः तस्यानुवीचिः–अनुलोमगमनं मैथुनगमनमित्यर्थः, तस्यानुलोमं मा कार्षीः प्रतिलोमं कुरु, एवं चोदितो माणुक्कडताए सम्मचिट्ठोऽवि च किलामिज्जति, ग्लै हर्षक्षये, दैन्यमायातीत्यर्थः, किमेप मामेवं चोदयतीत्यर्थः,'उसिनावि इत्थिपोसेहिं'वृत्तं ॥२६६॥ उसिता नाम वसिता, पोषयतीति पोषाः–भगं स्त्रियो वा पुष्णंतीति पोषकाः–भुक्तभोगिनः, इत्थिवेदो हि फुंफुमअग्गिसमाणो अवितृप्तो, नाग्निस्तृप्यति काष्ठानां, नापगानां महोदधिः। नांतकृत्सर्वभूतानां, न पुंसां वामलोचनाः ॥१॥ स्त्रियो वा येन वेद्यन्ते स स्त्रीवेदो भवति, वैशिकतन्त्रेऽप्युक्तं "एता हसंति च रुदंति च अर्थहेतोः, विश्वा-

सयंति च नरं न च विश्वसंति। स्त्रियः कृतार्थाः पुरुषं निरर्थकं, निष्पीलितालक्तकवत् त्यजंति ॥१॥"तथा अण्णे भणंति–पुरतो अण्णं पासे (अण्णं पिट्ठे) णिवज्जमाणीओ। अण्णं च तास हिअए जं च खमं तं करेंति महिलाओ ॥१॥" प्रज्ञया समन्विताः लोकलोकोत्तरशास्त्रविदः उत्पत्त्यादिबुद्धियुक्ता, एके, न सर्वे, णारीण वसं उवणमिंति, दृष्टान्तो वैशिकपाठकः, एगो किल जुआणो वेसियअहिज्जणणिमित्तं गिहातो णिग्गतो, पाडलिपुत्तं गच्छंतो अन्तरा एगंमि गामे एगाए इत्थीए भण्णति–सुकुमालसरीरो तुमं कत्थ वच्चसि ?, तेण भण्णति–वेसियसत्थं सिक्खगो वच्चामि, ताए भण्णइ–अधिज्जितुं मज्झेण एज्जाधि, सो तं अधिज्जिउं तीए समीवमागतो, सा य संभमेण उट्ठिता, तत्प्रयोजनार्थानि चाकाराणि दर्शयति, अब्भंगुव्वलणण्हाणाणि उव्वरगे काउं जहिट्ठपाणभोयणं भुंजावेन्ती ते आगारे करेति, तेण मं इच्छतित्तिकाउं हत्थे गहिता, तीए धाहा कतो, जणो पुच्छितो, गताउलो, गलंतिउदगं तस्सुवरि पक्खिविऊण भण्णति–एस गले लग्गएणं मरणं ण गतो, पच्छा जणे गते भणति–किं ते अधीतं ?, को इत्थीणं भावं जाणितुं समत्थोत्ति विसज्जितो गतो, 'अदु हत्थपादछेज्जाइं' वृत्तं ॥ २६७ ॥ अथेत्यानन्तर्ये परदारप्रसक्ता हि नरा नार्यश्च अपि तच्छेदं 'अदुवा वद्धमंस'ति पृष्ठौ वद्धाणिवत्कृत्यन्ते मांसानि चोत्कृत्य काकिणीमांसानि खाधिज्जंति,'अउ तेयसाभितवणाइं' तेजः–अग्निः तेनाभितप्यन्ते, तच्छेत्तुं वासीए सत्थएण वा खारेण उस्सिंचंति कलकलेण व 'अउ कण्णच्छेज्ज'वृत्तं ॥ २६८ ॥ कण्णा छिज्जंति णासाउ छिज्जंति कंठे छिज्जंतित्ति गलच्छेदः, तितिक्खंति पुरुषो वा ता वा स्त्रियः सहंत इत्यर्थः, एवं विलविज्जंतोवि, 'इति एत्थ पावसंतत्ता' अस्मिन् पापे संतप्ताः, पापं मैथुनं परदारं वा,'ण य बेंति पुणो ण करिस्सामो' का तर्हि भावना ?–अपि मरणमप्युपगच्छंति न च ततः पापाद्विनिवर्त्तंते, अपरः कल्पः–यदाऽसौ स्त्री केनचि उक्ता भवति त्वमेवं अकार्षीरिति पश्चा-

श्रीसूत्रकृताङ्गचूर्णिः ॥१४०॥

दमौ ब्रवीति–अउ हत्थपादछेज्जाइं इमे मे पादे छिंदाहि, जीवितस्यापि, मा च मे तं वयणं ब्रूहि, पट्ठिवद्धाणि व मे उक्कंताहि, कागणिमंसाणि च मे खावेहि, मा य मे असब्भावं भणाहि, अउतेयसा ता तिवणहि कडग्गिणा च मे डहाहि उम्गुएण वा मे डंभेहि, कुंभियाएण मे पयाहि, तच्छेऊण वा मे गाताइं खारेण सिंचाहि, कण्णं णासं कंठं वा मे छिंदाहि, मा एतं वितियं भणाहि एत्तोवि मे वियंगणाओ वेदणाओ वा खलियतरं अब्भाइक्खणं, तृतीयो विकल्पः–अभिशप्ता वाऽसौ ब्रूयात्—हस्तौ वा मे पादौ वा मे छिंदाहि पृष्ठीवद्धाणि वा मे उत्कृत्त काकीणिमांसाणि वा मे खादय वा, अउतेयसाभितवणाइं, तेयसा वा मां तृणैरावेष्ट्य अभितापय, शस्त्रेणान्यतरेण वा मे गात्राणि तक्षित्वा खारेण सिंच अउ कर्णौ छेद कर्णौष्ठौ वा नासां वा छिन्द कर्णं वा छिन्द इति, 'एत्थ पावसंसत्ता' पापं तदेव परदारगमनं तत्राऽऽसक्ताः, स्त्रियः, ण य वेन्ति पुणो न काहंति, अतीव हि ममासौ मनोऽनुकूलः, तस्य वाऽहं, नाहं तेण विना क्षत्रमात्रमपि जीवितुमुत्सहे, तं पुण मे वसयंसि जं जाणसि तं करेहि, एमेव पुरुषा अपि कामसंतप्ताः निवार्यमाणा ब्रुवते 'सुयमेवमेगेसिं' वृत्तं ॥२६९॥ श्रूयते स्म श्रुतं, श्रुतमिति विज्ञानं, लोकश्रुतिष्वपि तत् श्रूयते यथा स्त्रियश्चलस्वभावा दुर्भगाः संचया अदीर्घप्रेक्षिण्यो लहुसिकाः गर्विताः, एवं लोके आख्यायिकासु आख्यानकेषु च श्रूयते, इत्थिवेदो नाम वैशिकं, तत्रापदिष्टं–'दुर्विज्ञेयो हि भावः प्रमदानामिति, "दुर्ग्राह्यं हृदयं यथैव वदनं यद्दर्पणान्तर्गतं, भावः पर्वतमार्गदुर्गविषमः स्त्रीणां न विज्ञायते। चित्तं पुष्करपत्रतोयचपलं नैकत्र संतिष्ठते, नार्यो नाम विषाङ्कुरैरिव लतादोषैः समं वर्द्धिताः ॥१॥" अपि च–"सुट्ठुवि जियासु सुट्ठुवि पियासु सुट्ठुवि पलद्धपसरासु। अडईसु महिलासु य वीसंभो भे ण कायव्वो॥ १॥ हक्खुवउ अगुलिं ता पुरिसो सव्वंमि जीवलोअंमि। कामेन्तएण लोए जेण ण पत्तं तु वेमणसं॥२॥ अह एताणं पगतिया सव्वस्स

स्नेह-विपाकः

॥१४०॥

करेंति वेमणस्साइं। तस्स ण करेज्ज मंतुअ जस्स अलं चेव कामेणं ॥३॥ एवंपि ता वदित्ताणं यदा तु प्रस्थिता निवारिया भवति मैवं कार्षीः तदा न तु भूयः करिष्यामीति 'एवंपि ता वदित्ताणं अह पुण कम्मुणा अवकरेति' अपकृतं नाम यथा प्रतिपन्नं प्रतिज्ञातं वा न कुर्वन्ति, तासां हि अयमेव स्वभावः,'अण्णं मणेण चिन्तेंति'वृत्तं ॥२७०॥ कथं ?, क्षणरागत्वात्, तद्यथा–'आचार्या मर्कटा बालाः, स्त्रियो राजकुलानि च। मूर्खा भंडाश्च निवा(विप्रा)श्च, विज्ञेयाः क्षिप्ररागिणः॥१॥' यतश्चैवं तस्मा णो सद्दहेयव्वं, यदि नाम हावभावादीनाकारान् कुर्यात्, वायाए वा पत्तियावेज्ज, एवमादि तासां विज्ञाप्यं श्रद्धेयं, दत्तो वैशिकः किल एकया गणिकया तैस्तैः प्रकारैर्निमन्त्रीयमाणोऽपि नेष्टवान् तदाऽसावुक्तवती-त्वत्कृतेऽग्निं प्रविशामीति, तदाऽसौ यद्यत्तयोच्यते तत्र तत्रोत्तरमाह–एतदप्यस्ति वैशिके, तदाऽसौ पूर्वं सुरंगामुखे काष्ठसमूहं कृत्वा तं प्रज्वाल्य तत्रानुप्रवेश्य सुरुंगया स्वगृहमागता, दत्तकोऽपि च एतदप्यस्ति वैशिके, एवं विलपन्नपि भूत्तैर्वार्तिकैश्चितकायां प्रक्षिप्त एव, तस्मा तु णो सद्दहियव्वं 'जुवती समणं बूया'वृत्तं ॥२७१॥ चित्राणि अन्यतरवर्णोज्ज्वलानि अनेकवर्णानि वा, सा हि वस्त्राद्यलङ्कारविभूषिता श्रमणसमीपमागत्य 'विरता चरिस्सऽहं लूहं'णिव्विण्णाऽहं समणा घरवासेणं, भर्त्ता मे न प्रशक्तः, तस्य चाहमनिष्टा, स च ममेति, तेन विरता भूत्वा चरिष्याम्यहं लूहं, लूहो नाम संयमः, तं धर्म्मं तावदाचक्षस्वेति, भयाचायतीति भयंतारः, एवं संभाषमाणा प्रीतिविश्रंभावुत्पादयति, 'अदु साविया पवादेण' वृत्तं ॥२७२॥ श्राविकासु विश्रंभ उत्पद्यन्ते, नीषिधिकयाऽनुप्रविश्य वंदित्वा विश्रामणालक्ष्येण संबाधनादि कूलवारकवत्, काइ तु लिंगत्थिगा सिद्धपुत्ती वा भणति–अधं साधम्मिणी तुब्भंति, स एवमासन्नवर्त्तीनिभिः श्लिष्यते ॥ २७३ ॥ दृष्टान्तो जतुकुम्भः, जतुमयः कुम्भः जतुकुम्भः, जतुलिप्तो वा ज्योतिषः समीपे उपज्योति गलतीति वाक्यशेषः, एवं संवासेण विदुरपि सीदति, किं

पुनरविद्वानिति ?, उक्तं हि–तज्ज्ञानं तच्च विज्ञानं, स(तत्)तपः स च निश्चयः। सर्वमेकपदे नष्टं, सर्वथा किमपि स्त्रियः॥१॥" एवं तावदासन्नेभ्यः प्रतिवेश्मकस्त्रीभ्यो दोषः, एकतस्तु संवासे शीघ्रमेव विनाशः, जहा जतुकुम्भो जोतिं उपगूढः अग्गावाहितः अग्नि-मध्यमितो वा समंततो भस्त्राभिः प्रज्वलितेनासु अतितप्तो नाशमुपयाति, 'एवित्थिगाहिं अणगारा' आत्मपरोभयदोषैः आसु-चारित्रतो विनश्यंति, किंच–'कुव्वंति पावकम्मं' ॥ २७४ ॥ पापमिति मैथुनं परदारं वा, एगपुरिसे ण, संघसमितीए वा आहं-सुरिति आख्यान्ति–णाहं करेमि पावंति, एषा हि मम दुहिता भगिणी नत्ता वा, अंके सेत इति अंकशायिनी, पूर्वाभ्यासादेवैषा ममांके शेते निवार्यमाणा पर्यंकेन, 'बालस्स मंदयं बितियं' वृत्तं ॥ २७५ ॥ द्वाभ्यामाकलितो बालो, मंदो दव्वे य भावे य, दव्वे शरीरेण उपचयावचए, भावमंदो मंदबुद्धी अल्पबुद्धिरित्यर्थः, मंदता नाम बालतैव, कोऽर्थः ?–तस्य बालस्य बितिया बालता यदसौ कृत्वाऽवजानाति–नाहमेवं कारीति, ण वा एवं जाणामि, दुगुणं करेति से पावं, मेथुणं पावं, बितियं पुणो पूयासक्कारणिमित्तं, अविय अबलमिति सक्कारणिमित्तं, मा मे परोपरा भविस्सति, विसण्णो–असंजमो तमेसति विसण्णेसी 'संलोकणिज्जमणगारं' वृत्तं ॥२७६॥ संलोकणिज्जो णाम द्रष्टव्यो दर्शनीयो वा, तत्थ कोइ मुच्छिता आतगतं णाम अप्पाणएणं णिमंतेति, अथवा आत्म-गतः तस्स अशुभो भावः, संबंधामि ताव णं, ततो काहति वयणं–आहंसुत्ति आहु 'वत्थं च ताति पातं वा' त्रायतीति ताती अण्णं वा पाणं वा यच्चान्यदिच्छसि तत्तदहं सदैव दास्यामि इत्येवं संबद्धो ण तरिति उव्वरितुं, भगवान् भणति–'णीयारमेव बुज्झेज्ज' वृत्तं ॥२७७॥ निकरणं निकार्यते वा निकरः, यदुक्तं भवति–निकीर्यते गोरिव चारी, जहा वा सूकरस्स धण्णकुडगं कूडादि णिगि-रिज्जति, पुट्ठो य वहिज्जति, गलो वा मत्स्यस्य यथा क्रियते एवमसावपि मनुष्यसूकरकः वस्त्रादिनिकरणेन णिमंतिज्जति पच्छा संय-

मजीवियाओ वयरोइज्जति, वक्ष्यमाणान्यपि च नानाविधानि अकृत्यानि कारयंति, यतश्चैवं तेण संसारबद्धं संसारपासं च भावनिक-
रमेतत् बुद्ध्वा दूरतः तद्भावं णगरं वा जत्थ णिमंतिज्जति तं परिहरंतो ‘णो इच्छेज्जा अगारमागंतुं’ इति अगारत्वं अथवा आगा-
रमावत्तं आगारमेवावर्त्तः आगारमावर्त्तः कारणे कार्यवद् उपचारात् संसारावर्त्तः, यः पुनरत्र संबध्यते, संबंधो विसयदामेहिं, महि-
समयूरादीणं वग्घादीनि दामकानि वा, नरसूकराणं तु विसयदामगाणि, दाम्यन्ते एभिरिति दामकानि, बन्धनानीत्यर्थः, तैः बद्धः,
‘मोहमावज्जति पुणो मंदो’ मोहः–संसारस्तमेवागच्छतीति, अथवाऽनुकम्पया मन्दः स वराको मन्दो विषयपराजितः प्राप्यापि
प्रव्रज्यां पुनरपि मोहमागच्छतीति चतुर्थे इति प्रथम उद्देशः ॥

स एवाधिकारोऽनुवर्त्तते, प्रथमोद्देशकोक्तैराकारैराकृष्टा इहैव स्खलितधर्माणो णाणाविधाइं खलीकरणाइं पाविज्जंति, वक्ष्यमाणमपि
सुहिरीमणावि ते संता, संबंधो हि द्विविधः, तद्यथा–अनन्तरसूत्रसम्बन्धः परम्परसूत्रसम्बन्धश्च, णीयारमन्तं बुज्झेज्जा, बुद्धः ओयाभूतो
भविज्जासित्ति, ओजो–विषमः यदा बद्धस्तु भोगकामी पुणो विरज्जेज्ज, परंपरसूत्रसम्बन्धस्तु संलोकणिज्जमणगारं कदाचिन्निमन्त्रयति,
तत्र यः ओजः स सदा न रज्जेज्जा, अनोज इतरस्तु कदाचित् रज्जेज्ज, द्रव्यभावसम्बन्धस्य तु इहैव वाहनताडणादयो विलंबनाप्रकारा
भवन्ति, तादृसस्य वा बन्धनादयो दोषाः कर्मबन्धाच्च नरकादिविपाकः, एवं विपाकं मत्वा ‘ओए सदा ण रज्जेज्ज’ वृत्तं ॥२७८॥
द्रव्योजो हि असहायत्वात् परमाणुः, भावोजो रागदोसरहितो, स एवमोजः रागदोसरहितः पूर्वापरसंस्तवं जहाय ण तेसु अण्णत्थ
वा पुणो रज्जेज्ज, भोगकामी पुणो विरज्जेज्ज–णिज्झेज्जा, अथवा यद्यपि भोगकामी स्यात् तथापि पुणो विरज्जेज्ज, मा भूत् अत्य-
न्तरागवान् स्यात्, ते य ‘भोगे सण्णाण सुणेह’ भोगा न किलैषां ते निश्चयेन, गृहिणामपि भोगा विलंबना, किमु लिंगिनां ?,

॥१४३॥

अस्य पृष्ठे चतुर्थ अध्ययनस्य द्वितिय उद्देशक: आरभ्यते

ते य सुणेह, एगे न सव्वे, एगे किल जहा भुंजंते, केइ आउक्कायरियसायासोक्खपडिबंधेणं लिंगगच्छत्तणं करेंति, ण तु मोहदोसेणं। 'अथ नं तु भेदमावण्णं'वृत्तं ॥२७९॥ अथेत्यानन्तर्ये, तु विशेषणे, भावभेदं–चरित्रभेदमावण्णं, ण तु जीवितभेदं शरीरभेदं लिंगभेदं वा, मुच्छियं कामेसु दव्वभिक्खुं, कामेसु अतिअट्टं–कामेसु अतिगतं कामेसु अनिवत्तमाणं पलिभिन्दियाण–पडिसारेऊण मए तुज्झ अप्पा दिण्णो सर्वस्वं जनश्चावमानितः, ण इमो लोगो जातो ण परलोगो, तुमंपि णवरं खीलगघातो, मज्जायं जातिं वा ण सारेति, अप्पयं ताव अप्पएण जाणाहि, कस्स अण्णस्स मए मोत्तूण तु कज्जं कतं?, लुत्तसिरेण जल्लमइलितंगेणं दुग्गंधेणं पिंडोलएणं कक्षावक्षोवस्तिस्थानयूकावसथेन, स एवं पडिभिण्णो तीसे चलणेसु पडति, ताहे सा पडंतं मा मे अछियसुत्ति वामपादेणं मुद्दाणे पणहति, अणोयिंधणोऽवि ताव तस्मिन्काले हन्यते, किं पुण उयिंधणो?, उक्तं च–"व्याभिन्नकेसरवृहच्छिरसश्च सिंहा, नागाश्च दानमदराजिकृशैः कपोलैः। मेधाविनश्च पुरुषाः समरे च शूराः, स्त्रीसन्निधौ क्वचन कापुरुषा भवंति ॥१॥ कयाइ सा आगारी भणेज्ज पुव्वभज्जा व से अण्णा वा कायि 'जइ केसियाए मए भिक्खू' वृत्तं ॥ २८० ॥ केशाः अस्याः सन्तीति केशिका, जइ मए केसइत्तीए हे भिक्खू! णो विहरेज्ज 'सहणं'ति सह मया, कोऽर्थो?–जइ मए सवालिआए लज्जसि ततो 'केसेवि अहं लुंचिस्सं' तत्थ त्वं मए सह विहरेज्जासित्ति, मा पुणो इमं छड्डेऊण अण्णत्थ विहरेज्जासित्ति, एवमसौ ताव एव बद्धो तदनुरक्तः तीसे णिद्देसे चिट्ठति, ततोऽसौ 'अथ णं से होति उवलद्धे'वृत्तं ॥२८१॥ उवलद्धो नाम यथैषो मामनुरक्तो णिच्छुब्भंतोऽवि ण णस्सइत्ति 'ततो णं देसेंति तहारूवेहिं' तहारूवाइं णाम जाइं लिंगत्थाणुरूवाइं, न तु कृष्यादिकर्म्माणि गृहस्थानुरूपाणि, अलाउच्छेदं णाम पिप्पलगादि, जेण भिक्खाभायणस्स मुक्खं छिज्जति, जेण वा णिमोइज्ज वाहिरा वा तया अवणि-

ज्जति, वग्गुफलाणित्ति वग्गु णाम वाचा तस्याः फलाणि वग्गुफलाणि, धर्मकथाफलानीत्यर्थः, तुमं दिवसं लोगस्स बोल्लेण गलएण धम्मं कहेसि, जेसिं च कहेसि ते ण तरसि मग्गिऊणं ?, अथवा जोइसकोंटलवागरणफलाणि वा **'दारुगाणि अण्णपाणा या'** वृत्तं ॥ २८२ ॥ दारुगाणि आणय, आनीत्य विक्रीर्णाहि, अण्णपाणाय पढममालिया वा उवक्खडिज्जइत्ति, दोच्चगं वा परिताविज्जिहिति सीतलीभूतं, तेहिं 'पज्जोतो वा भविस्सति रातौ' भृशमुद्योतः, दीवतेल्लंपि णत्थि तेहिं उज्जोए सुहं अच्छिहामो, वियावेहामो वा, पाताणि य मे रयावेहि, का मम अणिअल्छियाए इहं पाताणि ते, तेण तुमं चेव आलत्तगं आणेहि, अथवा पायाइंति भायणाइं, लेवो छादगो, एवं कस्सइ णेमि सयं छाणतरंगेहिं लिंपावेहि ठाणं, एहि अतो मे पट्टिं उम्माहे, पुरिल्लं कायं अहं सक्केमि उवहेतुं, पिट्ठं पुण ण तरामि, **'वत्थाणि य मे पडिलेहे'** वृत्तं ॥ २८३ ॥ इमाणि वत्थाणि पेच्छ सुत्तदरिद्दयं गयाणि णिग्गियाहं जाया, अहवा किण्ण पस्ससि मइलीभूताणि तेण धोवेमि रयगस्स वा णं णेहि य, अहवा वत्थाणि मे पेहाहित्ति जओ लभेज्ज, अहवा एयाइं वत्थाइं वेंटियाए पडिलेहेहि, मा से उगारियाइं खज्जेज्ज, तहा रूवगवातएण वा भणेज्ज—मम वत्थाणि पडिलेहेहि, अण्णपाणं वा मे आहएहि, णाहं सक्केमि हिंडिउं,**'गंधं च रयोहरणं च'** गंधाणि ताव कोट्ठादीणि आहोहित्तुण्णाणि जेण गायाइं भुरुकुंडेत्ता, पठ्यते च 'गंथं च रयोहरणं वा' ग्रन्थ इति ग्रन्थः संघाडी रयहरणं सुन्दरं मे आणेहि, कासवगं—ण्हाविय्यमाणयाहि, ण तरामि लोयं कारवेत्तए,**'अउ अंजणिं अलंकारं'** वृत्तं ॥२८४॥ अंजणवाणियंमि अंजियं आणेहि, अलंकारे हारकेशाद्यलङ्कारं वा, सक्केसियाण कुकुहमो णाम तंबलीणा 'लोद्धं लोद्धकुसुमं च' लोध्रं कषायणिमित्त, लोद्धस्सेव कुसुमं तं तु गंधसंजोए उववज्जति, वेलुपलासी णाम वेलुमयी सण्हिगा कंपिगा, सा दंतेहि य वामहत्थेण घेत्तूणं दाहिणहत्थेण य वीणा इव वाइ-

जइ, पिच्छोला इत्यर्थः, एकता व ओसहगुलिया अत्थगुलिया अगतगुलिया च 'कोट्ठं तगरं अगरुं च' वृत्तं ॥२८५॥ हिरिवेरं णाम उसीरं, सेसाणि कंठाणि, एतानि हि प्रत्येकशः गंधंगाणि भवंति, समं हिरिवेरेणंति संयोगश्च भवति, 'तेल्लं मुहभिलंगाय' मुहमक्खणयं तेल्लं आणेहि, भिलंगायत्ति देसीभासाए मक्खणमेव, वेलुफलाइंति—वेलुमयी संबलिका संकोपेलिया करंडको वा, सण्णिधाणाएत्ति-तत्थ सण्णिधेस्सामो किंचि पोत्तं वा पत्तं वा ॥ २८६ ॥ णंदीचुण्णगं नाम जं समोइमं उड्डमक्खणगं येन तेन वा प्रकारेण भृशं आहराहि, अथवा चुण्णाइं वट्टमाणाइं, वरिसारत्ते वा गिम्हे वा छत्तगं जाणाहि उवाहणाउ वा, जाणाहित्ति—आणेहि, जतो जाणासि ततो, ते किं मए एतमवि जाणेतव्वं जहा णत्थित्ति, 'सत्थं च सूवच्छेदाए' सत्थं आसियगादि, सूवं णाम पत्रशाकं, जेण तं छिज्जति, आनीलो नाम गुलिआ साथालिया, एतेण साडिगा सुत्तं कंचुगं वा रावेहि, णीले रागे वा इमं वत्थं छुहाहि, अथवा कुसुंभगादिरागेण जाणति वत्थाणि रावेतुं तेण अप्पणो वा कज्जे वत्थरागं मग्गति, जेसिं वा रइस्सति मोल्लेण 'सुफणितं सागपाताए' वृत्तं ॥२८७॥ फणितं णाम पक्कं रद्धं वा, सुखं फणिज्जति जत्थ सा भवति सुफणी, लाडाणं जहिं कड्ढति तं सुफणित्ति वुच्चति, सुफणी वराडओ पत्तुल्लओ थाली पिउडगो वा, तत्थ अप्पेणवि इंधणेणं सुहं सीतकुसुणं उप्फणेहामो, सूवपागाएत्ति सूवमादि कुसुणप्पगारा सिज्झिहिन्ति, सुक्खकूरो णाम हिंडंतेहिवि लब्भति, आमलगा सिरोधोवणादी भक्खणार्थं वा, उक्तं हि—"भुक्त्वा फलानि भक्षयेद् बिल्वामलकवर्जानि, दगहरणी णाम कुंडो कलसिगा वा, दगधारणी अलुगा अरंजरगो वा, चशब्दात्तेल्लघतहरणिं च, तेसिं वा उद्धाइयाणं सव्वं णवगं संठवणं कायव्वंति तेण सव्वस्स घरोवक्खरस्स कारणा तं वड्ढेइ, सो य तं सव्वं हट्ठतुट्ठो करेति, 'तिलकरणिं अंजणिं सलागं'ति तिलकरणी णाम दंतमइया सुवण्णगादिमइया वा सा रोयणाए

दन्यथा, जहा किं ?, दीसंति० ॥६६६॥ (सूत्रं), णिहुअप्पणो स्वशास्त्रोक्तेन विधानेन निभृतः आत्मा येषां ते भवंति निभृतात्मानः युगंतरपदिट्ठिणो परिपूतपाणियपायिणो मोइणो णगणिणो विविचिका, तेसिंपि णो ध्यायिन इत्येवमादि न निभृतं, भिक्खामेत्तविचिणो साधुजीविणोत्ति ण कस्सइ उवग्गथेण जीवंति, के ?, ककुहागकुसयावज्जिणो, एवं वत्ते ते मिच्छा पडिवज्जंतित्ति, एवं दिट्ठिं न धारेज्ज, परेण पुट्ठेण एवं भणेज्जा–एते वरागा बालतपस्सिणो सव्वं मिच्छा करेंति, लोकविरुद्धं च, तं भणंतस्स ते लोए गाढरुट्ठीभूता पच्छा लोगो मा भणिहितित्ति एते मदीये सत्थिया गुणद्वेषिणः, अविदुः रुस्संति ण य उवसमंति, तेऽवि य जाव गेवेज्जा ताव उववज्जंति तो कहं एगतेणं एवं वुच्चति–सव्वमेतं णिरत्थगं किलिस्संति, नो णिच्चपुट्ठो वा भणिति–अणागाढमिच्छादिट्ठीसु, एतेवि किंचिदधेलोगफलिगं णिव्वत्तेन्ति, अयमण्णो अन्नउत्थियगिहत्थाणं दाणं प्रत्यव्यवहारः–दक्खिणाए पडिलंभो ॥६६७॥ (सूत्रं), दानं देंति देयते वा दक्षिणां, दक्षिणां प्रति लंभो, दक्षिणायाः प्रतिलंभः, अथवा दक्षिणाया लंभे प्रति दक्षिणालंभस्तया वा लंभितः स प्रतिलम्भः प्रतिमानवत् सम्मानितो वा भवति, एवं प्रतिकारप्रत्यपकाराप्रतिपूजादिष्वायोज्यं, स किं पात्रे वाऽपात्रे वा प्रतिलाभिते ?, ततो पडिलाभो अत्थि णत्थि पुच्छिज्जति भणति–एकान्ते नास्ति तत्थ दोसा, जारिसं वा विनीयं तारिसेणेव फलेण होतव्वं, तेण अधम्मियस्स कस्सइ इट्ठदाणं दिण्णं तेणवि मा णाम इट्ठेण फलेण होतव्वं, पावे वा अंतं पंतं दिण्णं तेणावि णाम अंतफलेण होतव्वं, एवमनेकान्तः, पत्ते तु इट्ठमणिट्ठं वा सड्ढाए अणुपरोधी दिज्जमाणं महप्फलं भवति, अपत्ते तु इट्ठमणिट्ठं वा दत्तं वधाय, तहावि ण वारिज्जति अंतराईयदोसोत्तिकाऊण, तथाऽणुज्ञायते न देहित्ति मज्जारपोसगादिट्ठंतेण मा अधिगरणं भविस्सति, तेण असंजतगिहत्थाणं अन्नउत्थियाण देहित्ति, किंच—इत्थ पुण पावं पुण्णं ण वियागरेज्जा, मेधावी जइ



श्रीसूत्रकृताङ्गचूर्णिः ॥४१३॥ २ श्रु. ६ अ.

पुण भणति–किं पत्तं जस्स मए दातव्यं ?, कथं ? वा किं वाऽस्य फलमिति तदाऽस्य कथ्यते, यो दातव्यं देयं, एवमेतान्यव्याकृतवक्तृनि यथा येषु स्थानेषु वक्तव्यानि तथोक्तानि अवक्तव्यान्यप्यन्येषु स्थानेषु यथा च वक्तव्यानि तथाप्युक्तं, एतेन लक्षणेनान्यान्यपि तथाऽवक्तव्यानि वक्तव्यानि च विज्ञेयानि, अतोऽतिप्रसक्तं लक्षणमितिकृत्वोच्यते,एवं सर्वत्रैव तद्विकल्पं करिष्यति तेनोद्वारः क्रियते– एकान्तेनैव ‘ सन्तिमग्गं च बूहए ’ शमनं–शान्तिः मग्गे–मार्गः जेण कथितेण उवसमंति सत्ताणि शासनवृद्धिश्च भवति तथा कथयति, सो पुण संतिमग्गो धम्मं कहंतेहिं पावाउतेहिं संगिण्हंतेहिं उवगिण्हंतेहिं बृंहितो भवति, उक्तं च–‘प्रावचनी धर्मकथी०’ एत्थ णत्थि भयणा, एगंतेन चैवं तथा तथा कहेतव्वं जहा जहा संतिमग्गो बृहिज्जति इच्चेएहिं ट्ठाणेहिं ॥६६८॥ (सूत्रं), कतराइं ठाणाइं ?, जाणि अणादीयं परिण्णादीयं परिण्णादीणि अववहारं णावतरति, जो अत्थि लोए वा अलोए वा ववहारं अवतरति, तेसु सव्वेसु संजयति तिरियमाणेसु अप्पाणं, कथं अप्पाणं वारयति, अववायं भणंति, एवं धारितो अप्पा कियंतं कालं ?, आमोक्खाए जाव ण मुच्चइ सव्वदुक्खेसु असाद्दा, शरीरकृत्वे, परि समंता वएज्जासि मोक्खाय परिव्वएज्जासित्ति बेमि ॥ अनाचारश्रुताख्यं पंचममध्ययनं समत्तं ॥

अनाचारश्रुतमुक्तं, यथा केन वर्जिता अनाचाराः, अनाचारश्च सेवितो सो भावतो तावदुच्यते–जहा अद्दएण, एस अज्झयणसंबंधो, णामणिप्फण्ण अद्दइज्जं, अद्दं णिक्खितव्वं–णामद्दं ठवणद्दं ॥१८४॥ गाथा, आर्द्रकमिति नाम, वत्थाण खिवमद्देण, वण्णद्दं चित्तकंमादिसु आर्द्रकं लिखितं, आर्द्रानक्षत्रं लिखितं, उदगद्दं सारद्दं ॥ १८५ ॥ गाथा, उदकार्द्रं यथा उदकार्द्रं गात्रं, केवि हरितया सुक्कंतयाए य अब्भन्तरे जं पंडुरगं, संसारो पण्णाणे णियसे अज्जवि शीत्यार्द्रः, एवं उल्लोल्लो अत्थित्ति विन्ति, तया

आर्द्रकवृत्तं

॥४१३॥

अथ द्वितिय्-श्रुतस्कन्धस्य षष्ठं अध्ययनं आरभ्यते

श्रीसूत्रकृताङ्गचूर्णिः ॥४१४॥

आर्द्रकवृत्तं

यथाऽयं पुरुषोऽस्थिषु निद्धो णज्जइ, से मक्खिताइं अंगाइं, आह हि–"त्वचि भोगाः सुखं मांसे", सिलेसद्धं जहा कोइरवंसो विततो समाणो पच्छा सिलेसेण मक्खिज्जति, पच्छा णिज्जति, गलितिचि, एवमादि, द्रव्यार्द्रं द्रव्यार्द्रः जहा उदगं सिलेसो य एते दोवि सयं चिय अद्दा अण्णंपि आर्द्रं कुर्वंति, सारद्दं, छवियद्दा पुण केवलं सयमेवाऽऽर्द्रा, भावद्दं रागद्दं लोगं भणति, आर्द्रसंतानो देवदत्तः स्नेहवानित्यर्थः, णेहतुप्तितगत्तस्स रेणु, उपरुचित्तं च तं कमद्दं, इह तु आर्द्रकनाम्ना पुरुषेणाधिकारः, तत्राप्यर्थाश्रयणमेवेतिकृत्वा तत्प्रयोजनमुक्तमेव भवति, द्रव्यभावार्द्रकविशेषास्तु पुनरुच्यन्ते, तत्थद्दओ तिविधो–एगभवियबद्धाउय ॥१८६॥ गाथा, अद्दाओ णामगोत्तं वेदेतो ततो समुट्ठिता गाथा, यद्यपि शृङ्गवेरादीनामार्द्रकसंज्ञा तथापि तेभ्यो नाध्ययनमिदं समुत्पन्नं तस्मात्तैर्नाधिकारः, जो चेव सो अद्दामिधाणो साधू तेणात्राधिकारः, तदेव अद्दकउप्पत्ती भणितव्वा,'तत्तो समुट्ठियमिणं' सा एया गाथा, जेण च तं, पतिट्ठिकं णाम गामो, तहिं सव्वे उ परिवसंति, संसारभयुव्विग्गा, धम्मघोसाण अंतिए पव्वइतो सह भारियाए, सो विहरति साधूहिं सह, इतरावि अज्जियाहिं सह, ताइं केताए नगरे समोसरिताइं, तेण सा भिक्खं हिंडमाणा दिट्ठा, सो तहिं अज्झोववण्णो, तेण संघाडिगो वुचति–एसा मम घरणी, पडिभज्जाविज्जउ, णेण चिंतितं–अकज्जएण ण उवेक्खितव्वं, तेण भण्णति–अज्जेव कतं वा मए, सो एवं भणिउं गतो पव्वइयापडिसयं, तेण महत्तरियाए सिट्ठो स उल्लावो, पच्छा महत्तरिताए सा भणिया–अज्जे! अण्णविसयं वच्चाहि, ताए भण्णति–अहं ओलिया कहिज्जामि, सो पुरिसो, सो उ दूरं अण्णदेसंपि वज्जेज्जा, अहं भत्तं पच्चक्खामीति, एवंति भणति, इतरेण दित्तस्स आगंतूण कहिज्जति, जहा इमं समोसरणं दुक्कडं, तत्थ मिल्हिहामो, इतरधा ण सक्कति, सो इच्छंति, दिवसं गणेंतो, इतराएवि ते दिवसे आसण्णत्ति काऊणं वेहाणसं कतं, तेहिं आयरियाणं णिवेदितं, जहा पव्वइता कालगता, इतरस्स

॥४१४॥


सोचूण अद्धिती जाता, अकज्जं, महच्चएणं तवस्सिणी कालगया, तेणवि भत्तं पच्चक्खातं, तं सो कालं गयो, समणी देवलोएसु उववण्णा, ताओ देवलागाओ चुता संती मेच्छविसए अद्दगसे अद्दगस्स रण्णो धारणीए देवीए कुच्छिंसि पुत्तत्ताए वक्कंता, तीसे णवण्हं मासाणं दारओ जातो, तस्स णामं कीरति अद्दओ, इतरोऽवि कालं काऊण देवलोएसु उववण्णो, तओ चुओ वसंतपुरे णगरे सिद्धिकुले दारिया जाया, इतरोऽवि जुव्वणत्थो जाओ, अण्णदा कयाई सो अद्दओ राया सेणियस्स रण्णो दूतं विसज्जति, तेण कुमारेण पुच्छिज्जति–कहिं वच्चसि ?, तेण वुच्चति–आयरियविसयं सेणियस्स रण्णो सगासं, सो तुज्झंपि पितियवयंसओ होति, तेण वुच्चइ–तस्स अत्थि कोइ पुत्तो णत्थि ?, तेणऽत्थित्ति वुत्ते अद्दकुमारो विचिंतेइ–तेण मित्तता होतु, सो तस्स पाहुडं विसज्जति, एयं अभयस्स उवणेतव्वं, सो दूतो तं गेण्हितुं रायगिहं नगरं आगतो, सेणियस्स रण्णो सव्वं अप्पाहणियं अक्खातियं, इतरदिवसे अभयस्स दुक्को, अभयकुमारसत्तं पाहुडं उवणेति, भणिओ य–जहा अद्दकुमारो अंजलिं करेइ, तेण पाहुडं पडिच्छिअं, दूतो य सक्कारिओ, अभओऽवि परिणामिताए बुद्धीए परिणामेऊण सो भवसिद्धीओ जो मए सद्धीं पीतिं करेइ, एवं संकप्पेऊण पडिमा कारिज्जइ, तं मंजूसाए छोढुं अच्छति, सो दूतो अण्णतावि आपुच्छइ, तेण तस्स मंजूसाए अप्पिता, भणिओ य एसो–जहा कुमारो भण्णइ–एतं मंजूसं रहस्से उग्घाडेज्जासि, मा महायणमज्झे, जहा ण कोइ पेच्छेइ, बहुपाहुडं पेसति, सो दूओ परं णगरं पडिगओ, अद्दस्स रण्णो सेणियपेसितं पाहुडं उवणेति अद्दस्स, सक्कारेतूण पडिविसज्जिओ, कुमारस्स मूलं गओ, अभयपेसवितं पाहुडं उवणेति अप्पाहणियं च अक्खाति, तेणवि सक्कारेऊण पडिविसज्जितो, इतरोऽवि तयं गहेऊण उवरिं भूमिं दूरूहित्ता जणविरहियं करेत्ता मंजूसं उग्घाडेति, सो पेच्छेति उसभसामिस्स संभं पडिमं, तस्स ईहापोहमग्गणगवेसणं करेंतस्स कहिं मए एयारिसं रूवं दिट्ठंति ?,

श्रीसूत्रकृताङ्गचूर्णिः ॥४१६॥

चिन्तेमाणस्स जाइसरणं उप्पण्णं, अहो मम अभएण णाहकिच्चं कयं, रहस्सिगं तं च काऊण परिभोगं उचितं ण परिभुंजति, ताहे रण्णा कथितं–जहा कुमारस्स जप्पभितिं आयरियविसयातो पाहुडं आणीतं तप्पभिइं जहोचितं परिभोगं न परिभुंजति, रायाए चिंतितं–णट्ठो कुमारो भवति, वच्चंतस्स अण्णेहिं आइक्खिज्जति, तेण चिन्तितं–जइ किहइ नस्सामि तो नट्ठं कज्जं भवति, सव्वधावि जहोचितं भोगं भुंजामि, रण्णा सुतं परिभुंजति, तस्सगासे पंचण्हं कुमारामच्चसताणं पंच पुत्तसयाइं आणविदिण्णाइं, भणियाइओ– जइ कुमारो णस्सति तो सव्वे विणासेमि, ते तं कुमारं आदरेणं रक्खंति, कुमारेणोवायो चिंतितो, आमवाहणियाए णिग्गच्छामि, एवं विस्सासेण पलाओ आसं विसज्जेऊण, देवताए य भणियं–सउवमग्गं, इतरेऽवि पविसित्ता अडवीए चोरियं करिंता अच्छिति, इतरोऽवि णाओ एक्कारसमं सावगपडिमं पडिवज्जित्ता आगतो वसंतपुरं णगरं, आयावेंतस्स पाडिहेरं कतं देवताए, तत्थ आतविंतो अच्छति, ताए दारियाए भण्णति–अहो मम पती आहेसि, ताहे अद्धतेरसहिरण्णकोडिओ पाडियाओ, रायाओट्ठितो घेतुं, सप्पा उट्ठेति, देवताए भणितं–एतं तीसे दारियाए, पितुणा संगोवितं, सोऽवि पगतो, सा सेट्ठिधूता अण्णेहिं वरिज्जति, तीए मातापितुं भणइ–एक्कस्स दिण्णा, जंसेतं धणं भुंज, तुमं जाणसि कहिं सो ?, णत्थि, णवरं पाए जाणामि, ताहे सा ताहिं भिक्खा दवा-विज्जति, जति जाणसि तो गेण्हेज्जासि, इतरो बारसण्हं वरिसाणं आगतो, सो तीए पाएहिं णातो, तस्स पच्छातो विसज्जिता, तो चिंतियं–उड्डाहो, पडिभग्गो, तस्स तहिं पुत्तो जातो, बारसण्हं वरिसाणं तहिं आपुच्छति, सा तहिं परुन्निया, सो दारओ भणति– किं कर्त्तसि ?, पिता ते पव्वइउकामो तो सुहं जीविस्सामि, सोऊण पुत्तेण वेढितुमारद्धो, तेणवि चिंतितं–जइएहिं तंतूहिं वेढिति तत्तिगाणि वरिसाणि अच्छामि, तेण बारसहिं वेढितो ताहे बारस वरिसाणि, पच्छंतो पुण्णेहिं पव्वइतो, ताए अडवीए चोलेति जीए

आर्द्रकवृत्तं

॥४१६॥



श्रीसूत्रकृताङ्गचूर्णिः ॥४१७॥

ताइं पंचसताइं, तेहिंतो पच्चमिण्णाए य पंचवि सयाइं पव्वइताइं, सो जाति तित्थगरमूलं, सो रायगिहं णगरं पविसंतओ, गोसालेण समं वातो, बुद्धेन सभं वादो, धिज्जातिएहिं परिव्वाएहिं तावसेहिं, सव्वे पडिहंतुं सामिपादमूलं जाति, तस्स वच्चंतस्स हत्थी वारिछूढओ, सो हत्थी अद्दगं पेच्छिऊण एवं चिंतेति–अद्दगस्स तेयपभावेण मुंचामि, तस्स य तेयपभावेण बंधणाणि छिण्णाणि, हत्थी णट्ठो, अद्दओ भणति–ण दुक्करं चारणपासमोयणं०, गतो णामणिप्फण्णो, सुत्तालावगणिप्फण्णे सुत्तमुच्चारेतव्वं–पुराकडं अद्द ! इमं ॥६६९॥ वृत्तं, ततस्तमार्द्रकं राजपुत्रं प्रत्येकबुद्धं भगवत्पादमूलं गच्छमाणं गोसाल आह–'पुरेकडं अद्द ! इमं सुणेहि' सर्वैरपि तीर्थकरैः कृतं पुरेकडं, आर्द्रक इति आर्द्रकस्यामन्त्रणं हे आर्द्रक राजपुत्र !, इमं यद्वक्ष्यामस्तच्छृणु 'एगंतयारी समणे पुरासी' सोऽयं वर्द्धमानः यत्सकाशं भवान् गच्छति पूर्वमेकान्तचारी आसीत्, तदेकान्तं द्रव्ये भावे च, द्रव्यैकान्तमारामोद्यानसुण्णघरादीणि एतेसु एगंतेसु चरति एगंतचारी पुरा आसित्ति, एस मए सद्धिं लाभालाभसुहदुक्खाइं अणुभवितवां, तत्थ भावणाठाणमोणासणादीहिं उग्गेहिं तवचरणेहिं णिब्भत्थितो समाणो दुक्करं एरिसा चारि जावज्जीवाए धारेयव्वत्तिकाउं मामवहाय बहवो भिक्खुणो मद्विधां प्राणादमात्राहार्यां मुंडेंति, पिंडिते य मुंडेत्ता य २ तेहिं बहूहिं परंसतेभ्यः इण्हि–साम्प्रतं आइक्खइ पुव्वावरण्हं, अदो व णं भिक्खुचरियादिकायकिलेसे णियत्तचित्तो पृथक् पृथक् पौनःपुण्येन जो जहा उववसति तस्स तहा परिकहेंतो अपरितंतो गामणगराइं आहिंडति, वित्थरेणंति अनेकैः पर्यायैर्वसु किल एष, सर्व इति लोकोत्पत्तिः, यतो पत्तियंतु पवत्तयंतो, एवं पूआगारवपरियारहेउं कधेति हिंडति गामाणुगामं, इत्यसात्कारणात्—सा ऽऽजीविया पट्ठविया ॥ ६७० ॥ वृत्तं, इथरथा हि एगाणियं विहरंतं ण कोइ पूएइ, ण वा अभिगच्छति, अथिरधम्मा अथिरो, कधमस्थिर इति चेत् यदा सो एगंतचारी भूत्वा स-

धर्मकथा-निर्दोषता

॥४१७॥

भातिगृहस्थानआरामगतो वा वृक्षमूलाश्रितो गृहं सरणमित्यर्थः, त्यक्त्वा गृहं किं पुनः गृहप्रवेशनेन ?, गणः समूहः, गणमध्ये आख्याति, नैककस्य, भिक्षुमध्ये सदेवमणुआसुराए परिसाए परिवुडो, जनाय हितं जन्यं बहुजनाय बहुजन्यं तं चार्थं कथयति, न सूक्ष्मं 'ण संधायति 'त्ति न संधिति, अवरं णाम जेनिमं तं साम्प्रतीयं वृत्तं–रत्नशिलापटः सिंहासनं छत्रं चामरं, अथवा–'अशोकवृक्षः सुरपुष्पवृष्टिर्दिव्यध्वनिश्चामरमासनं च भामण्डलं दुन्दुभिरातपत्रं, सत्प्रातिहार्याणि जिनेश्वराणाम् ॥१॥' अनेन देवेन्द्रदुर्लभेनापि विभूतिवृत्तेन यत्पूर्वोदितं एगंतचारित्तं तदन्योऽन्यव्याघातान्न संति । किंच–एगंतमेवं अदुवावि इण्हिं ॥६७१॥ यदि एकान्तचारित्वं शोभनमेतदेवात्यन्तं कर्त्तव्यमभविष्यत् . उत मन्यसे इदं महापरिवारवृत्तं साधु तदिदमादावेवाचरणीयमासीत्, तो किं बारसमधियाइं वरिसाइं किलेसितो ? यद्यस्मादिदं साम्प्रतीयं वृत्तं पोराणं च दोऽवि अण्णोऽण्णं ण समेन्ति न तुल्ये भवत इत्यर्थः, तस्मादतो पूर्वापरव्याहतवादी कारी च नाभिगमनीयोऽस्ति, एवं गोशालेनोक्ते भगवानार्द्रकः प्रत्येकबुद्धः तद्वाक्यमवज्ञयैव प्रहस्यैवं आह च–भो गोशाल! स हि भगवान् वर्द्धमानः 'पुव्विं वा पच्छा वा' पुव्विं छउमत्थकाले पच्छत्ति णाणे समुप्पन्ने अणागतं जावजीवाए तेसु तेसु तिकालेसु भगवान् 'एगंतमेवं पडिसंदधाती'ति वक्तव्ये ग्रन्थानुलोम्यात्सुखमोक्खोच्चारणाद्वृत्तबन्धानुवृत्तेश्च पसत्थं याति, स्यात्किमर्थं कथयति ?–'समिच्च लोगं ॥६७२॥ वृत्तं, सम्यक् ज्ञात्वेत्यर्थः, तसाणं थावराणं जीवाणं खेमं सयं करेति, अवधमित्यर्थः, अण्णेवि जीवे अण्णेसिं च जीवाणं खेमं काउकामो कथेति, समणेति वा माहणेति वा एगट्ठं, स एवं 'आइक्खमाणोऽवि' अपि पदार्थादिषु जनसहस्रयोः जनसहस्राणां वा मध्ये एकभावः एकत्वं, सर्वेद्धृतोः सारि इत्येवं कृते सृजति कथिदित्येवं विगृह्य सारयतीति भवति एकत्वं गमयति, कथं नाम भव्याः एकत्वं भजेयुः, प्रव्रज्यामित्यर्थः, रागद्वेष-

विप्रमुक्तं हि एकं तस्स वल्लुलो(त्थुतो), आत्मानमपि च एगंतमेवं सारयतीति, रागद्वेषप्रहीणत्तं, जेण मज्झेवि वसंतो, तथा चोक्तं 'कामक्रोधावनिर्जित्य०', स्यात्–तदेतदेकत्वावस्थितस्य कृतार्थस्य च किं परोपदेशेन ?, तदुच्यते कर्म्मक्षयार्थं, आह हि 'येनैतच्छुभं तीर्थकरत्वनाम 'तीर्थकरस्वाभाव्यात् वेति, उक्तं–'तत्स्वाभाव्यादेव०' तं वद्धति, अर्चा नाम लेश्या, सा य शुक्कलेसो चेव, न राग-दोसाभिभूत इव संकिलिट्ठलेसाओ परिणमति, अथवा अर्चंति सरीरं, सीहासणे आविट्ठोवि धम्मं कहंतो तेण पुप्फवत्थगंधादीहिं अलंकारेहिं तहा अर्च एव निर्भूष इत्यर्थः, निर्दोषत्वाच्च, धम्मं कहेंतस्स उ णत्थि दोसो ॥६७३॥ वृत्तं, क्षान्तिग्रहणं यतिवि दुव्वियड्ढबुद्धि चोदेति न वा कथ्यमानं परियच्छति तत्थवि ण रुस्सति 'दंतो'ति कसायदंतो 'जिइंदिओ'त्ति इंदियदंतो, पृथगु-च्चारणा इंदियणोइंदियदंतविसेसो दरिसितो कक्कडगणिट्ठुर सावज्जा य भासादोसा, हितमितदेशकालादि भासागुणेहिं, आहहि– "दिट्ठं मितं असंदिद्धं०" स्यादसौ भाषादोषगुणज्ञो किं भगवान् समाख्याति ?, उच्यते–महव्वए पंच अणुव्वए य ॥ ६७४ ॥ वृत्तं, साधूणं महव्वए सावगाणं अणुव्वए य, महव्वए तव्विवरीता एव प्राणवधादयः पंचाश्रवा भवन्ति, 'संवर' इति इंदियाणं 'विरति'त्ति महाव्रतवत्ता, इंद्रियसंवृतस्य सतो विरतिर्भवति, अथवा असंजमाविरते 'इहे'ति इह प्रवचने लोके वा श्रमणभावं श्रामणीयं प्रज्ञानवान् प्रज्ञो, ण आख्यान्नपि वाक्यशेषः 'लवं' कर्म्म ततोऽवसक्कति लवावसर्की न, नो वाचिकेन कर्मणा मानसेण वा युज्यत इत्यर्थः, श्रमणो भगवानेव एवं ब्रवीमि स्वयमपि 'भगवं पंचमहव्वयगुत्तो इंदियसंवुडो य विरतो य। अण्णेसिंपि तमेव य धम्मं देसेति गाहेति ॥ १ ॥' यस्मात् ब्रवीपि वयमपि व्रतमन्तः इन्द्रियसंवृत्ता विरताश्च, यदि च मन्यसे शीतोदकपायित्वाद् बीयादिकन्दभोजनात् उद्दिष्टभोजनात् स्त्रीविषयोपसेवनाच्च किमस्माकं ?, असाधुत्वं, तत्रेदं कारणं शृणु–अस्माकमाजीविकानामयं

कृतान्तः, क इति चेद् उच्यते—सीओदगं सेवउ ॥६७५॥ वृत्तं, सीतमसत्थोवहतं सीतमेव जलं, बीजं जस्स, को एस भवति ? सव्वो चेव वणस्सती गहितो, आत्मन्यायाय कृतं आधाकर्म्म, इत्थियाओ य, अम्हे एताइं पडिसेवामोत्ति तेण असंतेति सणु कारणं—आतवघम्मपरिताविता सीतोदकेण अप्पाइज्जामो, कन्दमूलादीणि आधाकम्मं च शरीरसाधारणट्ठमेव पडिसेवामो, न चान्यकृतेन कर्मणाऽन्यो बध्यते, प्राणानुग्रहाच्च आधाकर्म्मानुज्ञा, एवं कृतादीन्यपि अस्मानाधाय क्रीतानि कल्पन्ते, इत्थियाओवि आसेविज्जंति मनसो येन समाधिमुत्पादयन्ति, सेव्यमानास्तु उच्चारप्रश्रवणनिसर्गदृष्टान्तसामर्थ्यात् मनःसमाधिमुत्पादयन्ति, ततो ध्यातव्याः शेषाः क्रियाविशेषाः स्वस्थचित्तैः सुखमासेव्यंते, परानुग्रहाच्च सेव्याः, आह हि—"सुखानि दत्त्वा सुखानि" जंपि य एतेहिं सीतोदगादिएहिं इत्थीपज्जवसाणेहिं कम्मं उवचिज्जतित्ति यदि मन्यसे, एगंतचारीसु एगंते उज्जाणादिसु चरंति एगंतचारी इहइं आजीवकम्मे जम्हाणं आतावणमोणत्थाणासणअनमनास्नानकादीहिं घोराणि एतेहिं चेव एगंतवत्तादीहिं गुणेहिं खविज्जंति, जतिय सीतोदगादिदोसोवचितं कम्मं ण सक्कामो खवितुं ततो अणेगभवसहस्ससमज्जितं कम्मं कथं खविस्सामो ?, तेण 'अप्पेण बहुमेसेज्ज' सीतोदगादिसेवा अणुस्सिता तदेवमादिदोसेसु अदोषदर्शित्वादेहि आगच्छ, एवं गोसालेनोक्ते आह—सीतोदगं वा तह बीअ० ॥ ६७६ ॥ वृत्तं, इह सीतोदगं बीजकायं आधायकम्मं इत्थियाओ य सेवमाणावि वयं समणा होमो यदुक्तं त्वया तेन समानवृत्तत्वात् अगारिणो समणा भवंति त्वन्मतेन, तेवि हि सीतोदगादीणि सेवंति, तेन प्रकारेण तहा तेवि तहप्पगारं वृत्तं कुर्वन्तीत्यन्यथा वा का प्रत्यासा ?, अथ मन्यसे समानवृत्ते वयमेव श्रमणा न गृहस्थाः पंचिकात्र न भोजयितव्या जे यावि सीतोदगमेव (बीओदगभोति) भिक्खू ॥६७८॥ वृत्तं, कोइ णम्मित्थीओ परिहरति लोकरवभीतो, बालो वृद्धो वा, न धर्मयोग्यो वा

सीवज्जमपि सीतोदगभोजी नाममिक्खू भिक्खं च इह ताव केजीवतो ध्याननिमित्तं जीवितट्ठता एवंप्रकारा, णातीण संजोगो णाति संजोगो पूर्वापरसंबंधादि, अपि पदार्थादिषु, णातिसंयोगमिति दुप्पजहणिज्जं, मुमुक्षवोऽपि संतः कायोपका एव भवंति, अनंतं कुर्वन्तीत्यनन्तकराः कर्मणां संसारस्य भवस्य दुःखानामेवेत्यर्थः, एवमुक्तो आर्द्रकेन गोशालो जाहे अण्णं उत्तरं न तरति ताहे अण्णउत्थिए वितिजए गिण्हति, दुब्बलो वा कडुच्छडीए, एवं वाई तुमं (इमं वयं तु तुमं) ॥६७९॥ वृत्तं, एतां एतत्प्रकारां, प्रादुः प्रकाशने, प्रकाशं कुर्वन्तीत्यर्थः, कथं ?, भणति–सीतोदकायं आधाकम्माइं इत्थिया जीवो आउ य सेवमाणा अममणा भवंति कायोवगा, कायोवगत्वाच्च नांतकरा भवंति, तेन शाक्याः सर्वे शीतोदगभोजका ये आधाकम्माइं सेवंति अबंभमवि पेष्यगोपसुवर्गाणां, सांख्यास्तु 'प्राप्तानाप्तुपभोग' इति वचनात्, एवं वाचः प्रादुः कुर्वन्ति, प्रवदनशीला प्रावादुकाः तान् गरहसि आत्मोत्सेकेन, न चोत्सेकः शिवाय, आर्द्रक आह–ननु पावादिनोऽपि पुढो, ते हि पावादिया पुढोत्ति आत्मीयं पक्षं कीर्त्तयन्तो–वर्णयन्तः स्वं स्वं दृष्टिं कुर्वंति–करेंति प्रादुः, प्रकाशयन्तीति–अण्णमण्णस्स तु ते (ते अण्णमण्णस्स उ) ॥६८०॥ इति प्रागुपदिष्टाः प्रावादुकाः अन्यश्चान्यश्च अण्णमण्णं अण्णमण्णस्स विविधं विशिष्टं वा गरहमाणाः कुदृष्टिमाचरंति, वाक्याध्याहारः आख्यान्ति परशास्त्रदोषांश्च आविः कुर्वते, श्रमणाश्च ब्राह्मणाश्च, किमाख्यान्ति,'सतो य अत्थि असतो य' स्वमात्मीयवचनमित्यर्थः, तस्मात् सुतं श्रेयोऽस्ति निर्वाणमित्यर्थः, परस्मात्परतः, अन्यस्मात्प्रवचनादित्यर्थः, नास्तीति नास्ति, निःश्रेयसं वा निर्वाणमित्यर्थः, एवं ते सर्वे अहमिति व्यवस्थिताः स्वपक्षसिद्धिमिच्छन्ति परपक्षस्य चासिद्धिं, उक्तं च–"जहिं जस्स जं ववसितं" वयमपि स्वपक्षमेवावलंब्यापरां शाक्यां दृष्टिं गरिहामः तान्, ननु किंच गरहामो ?, न यथा त्वं पापदृष्टिः मिथ्यादृष्टिः मूढो मूर्खः अजानको वेति,

श्रीसूत्रकृताङ्गचूर्णिः ॥४२२॥

किंचिद्रूपेन रूपमिति यथा लोको लोकं कस्मिँश्चिदपराधे आक्रोशति काणः कुब्जः कोढी वेति, जात्या वेति चण्डालकर्म्म करोति, नैवं किंचिद्रूपेण त्रिदण्डिक दुष्ट परिव्राजक दुष्ट! इदं ते दुर्दृष्टं शासनं, तेन मूर्खकपिलेन किं दृष्टं येन कर्त्ता क्षेत्रज्ञः, घटं च करोमीत्य संधिं करोति, कुम्भकारोऽकुर्वन् कथ कुम्भकारः, कुर्वन् कुम्भकरो भवति, एवं न ब्रूमो, वीतरागोपदेशाद्येषामेषा दृष्टिरकर्त्तात्मा निर्लेपश्च तेषां घटं साधयामीति मृत्पिण्डदण्डाद्युपादानक्रियैव न युज्यते, निर्लेपस्य च शौचक्रिया वा किं क्रियते?, कथं चास्य केवलज्ञानं नोत्पद्यते शुद्धस्य?, यतः शाक्या अपि नो रूपताः प्रत्यक्षमित्यर्थः, हे कषायकठ शाक्याक शाक्यपुत्र कथमिदं ते दृष्टं सुखमस्ति चेन्न च सुखी तद्दा स्कन्धाः, न च किलिस्यतां, न किं चूस्यते, येषामेषा दृष्टिः सुखमस्ति चेन्न च सुखी, त एव दोषाः अभिमुखं अभिधारयामः, वाचं वेमीत्यर्थः, किन्तु स्वं दृष्टिं संदिदृक्षं करेमो कुर्म्मः प्रादुः प्रकाशमित्यर्थः, तद्यथा—जीवं प्रति सद्भूतोऽन्यो मूर्त्तोऽम्त्यात्मेति, यस्य पुनर्वादिनः नास्त्यात्मा तस्य जातिस्मरणादीनि न विद्यन्ते, दानदमाध्ययनक्रियाश्च न युक्ताः, न तु ब्रमः शाक्या अन्ये वा नास्तिकवादिनः हे मूर्खा!, यद्यात्मा नास्ति ततोऽसौ शुद्धोदनपुत्रो बुद्धो नास्ति, वक्तृवचनवाच्याविशेषा न किं केन कस्स वोपदिष्टमिति, ननु मत्तोन्मत्तप्रलापः, एवमन्यत्रापि प्रवादिष्वायोज्यं, इत्येवं दृष्टिं गरहामो, नतु किंचिद्वादिनां संमुखे ब्रूमो धिक्किमास्से, मूर्खदृष्टिर्मिथ्यादृष्टिर्वेति एवं स्वदृष्टौ प्रादुःक्रियमाणाया तिण्णि तिसट्ठाइं दिट्ठिसताइं परूविज्जंति, मिच्छत्तंतिकाउं तेसु दिट्ठी न कायव्वा, स्यात् किं तत्प्रादुःक्रियते?,'मग्गे इमे किट्ठिए आरिएहिं' सम्यग्दर्शनादिमार्गः कीर्त्तितः आख्यातः णाणारियादीहिं, नास्योत्तरोऽन्यो मार्गो विद्यते शोभनपुरुषसर्वज्ञत्वात्तथाकारित्वाच्च अज्ञक दुज्ञओ न पूर्वापरव्याहतः शाक्यस्येव, यथा ज्ञानमुत्पन्नं, आर्द्रकं च राजपुत्रं मृतं न ज्ञातवान्, स्यादेकं किं निष्ठुरं स्पष्टं नाभिधीयते, त्वं मूर्खो वा कुदृष्टि-

आजीविकनिरासः

॥४२२॥

वेंति, तदुच्यते, मा भूत्तस्य दुःखं, स्यात्किं वा निष्ठुरमुच्यमानस्य मनो दुःखाच्छरीरमपि स्याद् हृदयरोगादि, तेण उड्ढं अहेयं ॥६८२॥ पण्णवगदिसाओ गहिताओ ते थावरा तसा पाणा भूयाभिसंकाए संकालये अण्णाणे च, इहं तु भवे वुसिय, वुसियं वुसिमं वुत्तो, ण किंचि गरहति णिंदति वा सव्वलोए, सव्वलोएत्ति त्रैलोक्ये पासंडलोके वा, एवं निर्लोठिते वादे आजीविकगुरुराह–यद्यसावेवं गुरुर्वीतरागोऽनुत्तरमार्गोपदेशकत्वात्सत्पुरुषः सर्वज्ञश्चाथ किं यथा वयं आगंतारादिसु ण वसति सत्तूजणे ?, **आगंतारे आरामगारे** ॥६८३॥ वृत्तं, आगत्य २ यस्मिन्नरास्तिष्ठन्ति तदिदं सभा प्रपेत्यादि, आरामे आगारं २, समणो सो चेव जो भंतित्ति तित्थगरो, भीतो ण अवेति वा स्यात्, कस्य भीतः ?, उच्यते–दक्खा, दक्खा नाम अनेकशास्त्रविशारदाः सांख्यादयः किंचिदूणेण केचिदतिरिक्ता जत्थ ऊणा अतिरिक्ता वा तत्थ समाधि अत्थि, जपलप व्यक्तायां वाचि लपालप इति वीप्सा भृशंलपा लपालपा वा, जहा दवदवादि, तुरितं वा गच्छ गच्छ वा, उक्तं हि–"देवदेवस्स", अथापियं एवं वडवडादि किमेवं लवलवेसि ?, त एव दक्षाः?, पुनरुच्यन्ते **मेधाविणो** ॥६८४॥ वृत्तं, ग्रहणधारणासमर्थाः, शिक्षिता अणेगाणि व्याकरणसांख्यविशेषिकबौद्धाजीवकन्यायादीणि शास्त्राणि, बुद्धिरुत्पत्तिकाद्या तत्र विनिश्चयज्ञा इति, निपद्यानि सूत्राणि जानन्ते पठन्ति वा गद्यन्युतकानि, तानि च परोपपेतानि, अर्थं चानेकप्रकारं जानते भाषन्ते च विशारदाः, जानका एवैते चैवं जानका बहुजनसन्निपातेषु वसंतं पुच्छिसु, मा णे अणगारा शाक्यदीवकाद्याः पृष्टवन्तः, पुच्छिसुत्ति णूणं कत्थइ, सो बहुजणमगासे सभादिआवासे आवसितो संतो, तेहिं पुच्छितव्वो अन्नैर्वहन्तो तद्भचान्मा मं पुच्छिस्संति, अनिवहंतो य महाजणमज्झे लज्जावितो होमु परिभूतो अ अजाणओत्ति,'इति' एवं 'संकमाणे' वीहमाणे इत्यर्थः, 'ण उवेति तत्थ' सुण्णघरजिण्णुज्जाणगिहेसु पंडितजणेण सुरभिगंधेसु आसेवंति, आह च–"पाएण खीणदव्वा"

इत्यादि, समयत्वात् न वीतरागो न च सर्वज्ञ इति, किंचान्यत्—कत्थति दूरंपि गंतुं कथयति, काणि य गामणगराणि ण चेव गच्छति, काणि य वोलेउंपि कथेति, न च वीतरागस्य वैषम्यं युज्यते, स हि पर्जन्य इव सर्वत्र समकारी, आह च-"विद्याविनयसंपन्ने, ब्राह्मणे०" उच्यते, णो कामकिच्चा ॥६८५॥ वृत्तं,'कमु इच्छायां' करणीयं कृत्यं अकामं कृत्यं करोति अकामकिच्चं तन्न तावदकामः कथयति बालवत् मन्यमानोऽपि परानुरोधात् न गौरवाद् वा, न बालकिच्चंति न बलात्कारात्, ह्रस्वदीर्घते विवक्षानुलोम्यात्, बलकिच्चेति वक्तव्ये चकारस्य दीर्घत्वे कृते णाम बालकिच्चा भवति, जहा बलं, णाणादिमति यो येण, कुतस्तदिदं भयं जितभयस्य ?, स्यात्कथं व्याकरोति ?, तदुच्यते-एभिरकामकृत्यादिदोषैर्विप्रमुक्तः विविधं विशिष्टमन्येभ्यो बालादिभ्यो वा करेति विविधं करेति, पुच्छं नितमिति प्रश्नः पुट्ठो अपुट्ठो वा, जेण अपुट्ठे करुणाइंपि अत्थि, जहा चिरसंसट्ठोऽसि मे गोतमा! आयातिठाणाणि य, अथ ब्रविषि किं वीतरागस्स धम्मदेसणाए ?, कथं वा गंतुं कथेति ?, तत्थवि अणियमो, कत्थयि गंतुं कथेति, मज्झिमं गंतुं तप्पढमताए गणधरा संबोधिता, तत्थ गंतुं कथेति, तं वंदणवत्तीयादीहिं आगताणं देवाणं पाएणंति चेव, तेनोच्यते-गंता च तत्थ ॥ ६८६ ॥ वृत्तं, पसिणं प्रश्नः प्रजावत् जत्थ जाणति धुवं पडिवज्जिस्संति तत्थ गंतुं कथेति, जेवि सोउं एंति तेसिंपि ट्ठाणट्ठितो चेव कथयति, ण जाणति जं जुत्तं जत्थ ण कोइ पडिवज्जति तत्थ ण वच्चति, अमूढलक्षत्वाच्च ठाणत्थोवि ण कथेति जत्थ ण कोइ पडिवज्जति, किं भणसि ?, जइ सो एवं 'वीतरागो सव्वण्णू कथयतो कीस अणारिए देसे गंतुं ण संबोधयति', तत उच्यते-अणारिया जे देसा सगजवणादी दृष्टिर्दर्शनं परित्ता इति परित्तदर्शना दीर्घदर्शना न दीर्घसंसारदर्शिनस्तदपायदर्शिनो वा, इहलोकमेवैकं पश्यन्ति, को जाणति परलोगो ?, शिश्नोदरपगायणाः, न एते धर्मं प्रति पश्यन्त इति शङ्कमान

श्रीसूत्रकृताङ्गचूर्णिः ॥४२५॥

इत्यर्थः, शंकाशब्दो ज्ञानार्थ एव तदुभये मन्तव्यः, आह हि–“शङ्के प्रहर्षतुला०” जेवि य आरियदेसेसु अणारियदेसेण अपरिचिता गामा णगरा य तत्थवि ण वच्चइ, ण वा तेसिं कथयति, तदेवं भगवंतो देसे तारिसएवि अणारियेतुल्ले ण इत्थं धम्मं कोइ पडिवज्जइत्ति; नतु भयाद्भवतां, सदेवासुराए परिसाए, देवा अच्छराइयाणं तिण्णि वा, तिदिवंपि चेव तेसिं चेव, भवद्विधाः परपासंडतित्थगरापि न शक्नुवन्त्युत्तरं दातुं, किं तर्हि तज्जिप्या आत्मवलिष्टाः प्रमथमिश्राः, तिष्ठन्तु ताव, एवमुक्त आर्द्रकेन गोशालः पुनराह–अस्तु ताव जत्थ जत्थ पडिवज्जंति धम्मं तत्थ गमणं कथणं च–पन्नं जहा वणिए ॥ ६८७ ॥ वृत्तं, तुल्लो सो णासो, पण्णं जहा, पण्णंति तमिति पण्णगं गणिमधरीमादि, उदओ लाभओ, उदयस्स अट्ठाए आयस्स हेतुं, एतीत्यायो लाभ इत्यर्थः, ‘पंज संगे’ पंजनं सक्तिर्वा संगः, जत्थ लाभओ तत्थ वणिया भंडे घेत्तूण वच्चंति, एवं णाम तुज्झवि तित्थगरो जत्थ लाभओ तत्थ वच्चति कथेति वा इत्युक्तौ ब्रवीमि ‘ततोवमे’, इति एवं इच्चेवं होति मम तक्का, तर्का मति मीमांसा वा इत्युक्तो गोशालेन राजपुत्रो आह–अस्तीयं एगदेसोपमा जहा लाभगट्ठी वणिओ ववहरति एवं भगवं लाभट्ठी तवं च संजमं च करेइ, तस्स के गुणा भवंति ?, तदुच्यते–णवं ण कुज्जा ॥६८८॥ वृत्तं, जतो ताव कम्मक्खवणट्ठा उट्ठितस्स ण वज्झति तेण संजमं करेति, जेण विधुणिज्जइ पुराणगं पावं तेण तवं करेइ, चिच्चा छड्डेतुं असोभणमतिं अमतिं, अण्णहेतुं वा पूजापरियारहेतुं वा ण कथेति, तीर्णोवि परान् तारेतीति, स्याद् धर्मकथायां कः प्रस्तावः संजमस्य तपसो वा यद् ब्रविषि ‘णवं ण कुज्जा विहुणे पुराणं ?’, तदुच्यते–णाणं सिक्खति णाणं गुणेति णाणेण कुणइ किच्चाइं; णाणी णवं ण बंधेति०’ किंच–सो य खलु णाणपरिणतो, तेण संवृतो, संवर एव संवरस्तथावि अन्नतरो धम्मकथावसाणो पंचविधो सज्झाओ, इच्चेवं धम्मकथाएवि संवरट्ठाणं उत्तरोऽस्ति तेनोच्यते–‘णवं ण कुज्जा विहुए’

गोशालक-निरासः

॥४२५॥

एतावतो बंभचेरं, एतदेव तद् ब्रह्मणः पदं, ब्रह्मपदं वा, ब्रह्मव्रतं वा, किमिति चेत् ब्रह्मेति चरितं दुविधं तवचरणं संजमजोगो तं उवेतः, उदइओ लाभओ संजमस्स तवस्स वा, उक्तं हि–उदइग पक्खेवे' उदएण वा जस्स अट्ठो भवति, समणो भगवानेव, एवं ब्रवीमि, नतु सर्वसाधर्म्यमस्ति भगवतो वणिजेहिं, कथं ?–**समारभंते हि वणिया** ॥६८९॥ वृत्तं, समारभंते क्रयविक्रय-भंडसगडवाहणपयणपयावणादीहिं आरंभंता समारभंति छक्कायभूतग्रामं, परिग्रहो दुपदं चउप्पदं धणं धण्णहिरण्णसुवण्णादि त एव ममायमाणा रक्खंता णट्ठविणट्ठं च सोअंता उवणिजंता य सुबहुं पावकम्मं कलिकलुसं तु एवं वृत्ता, स एवं कम्मसमाचारो य णातिसंजोगो, तं अभिग्रहाय तेसिं अप्पणो य अट्ठाए, आयहेतुंति आयलाभओ लाभट्ठाए एए णाइसंजोगा तस्सट्ठाएत्ति वुत्तं होति, भृशं करेंति प्रकरेंति, सक्किं संयं। किंचान्यत्–ते हि वणिजा–**वित्तेसिणो** ॥ ६९० ॥ वृत्तं, 'वित्तं' हिरण्णसुवण्णवित्तं तं एसंति गवो, मिथुनभावो मैथुनं, सं प्रगाढा २ समस्तं गाढाः, भुञ्जत इति भोजनं अशनादि व्रजंति, भोजनं अशनादि, व्रजन्ति दिशः संक्षेपार्थं ते वणिओ, वित्तं किमर्थमेषमाणा दिशो व्रजन्ति ?, उच्यते, मैथुनार्थं भोजनार्थं वेति, आह हि–"शिश्नोदरकृते पार्थ !" विरक्ताः स्त्रीकामेभ्यो जितजिह्वेन्द्रियाश्च, वयं तु तुर्विशेषणे विरक्ताः अन्यतीर्थेभ्यः, किं पुनर्गृहीभ्यः, त एवं इत्थि-कामेसु वित्तादि भोयणे रसेसु अ अज्झोववण्णा वणिया, जहा रसेसु तहा सेसेसुवि विसएसु सद्दातिसु, अथवा रस इति सुखस्य आख्या, आह हि–'आस्वादे शीघ्रभावे च' तथा चाह–'विषया विनिवर्त्तन्ते, निराहारस्य देहिनः।' रसवर्जं, रसेसु गृद्धति सुखेसु गिद्धा इत्यर्थः, इतश्च सामान्यवृत्तं भवतां वणिजा, कथम् ?–**आरंभगं चेव परि०** ॥६९१॥ वृत्तं, आरम्भो, उक्षसकटभरादीणां पचनपाचनच्छेदनादीनां च हिंसाद्वाराणां, परिग्रहे ममीकारः धनधान्यादि, संरक्षणं च, परिग्रहार्थमेव चारंभः क्रियते तमारंभं च

श्रीसूत्रकृताङ्गचूर्णिः ॥४२७॥

परिग्रहं च अविउस्सिया णाम अवोसिरिउं, णिस्सिता तंमि आरंभे परिग्रहे वा, पुव्वापरसंबंधे च णिस्सिता, आत्मन इति जीवान् दण्डयति बन्धवधपरितापणोद्दवणादीहिं तद्दुःखोत्पादनाद्वा आत्मानं दण्डयंति संसारे। किंचान्यत् 'तेसिं च से उदए' तेसिं वणियाणं 'सो उदए'त्ति सो लाभओ चाउरंतमणंतसंसाराय भवति, ण तु इह धम्मकथारज्जलाभो पुण चाउरंतसंसारविप्पमोक्खाय किंचान्यत्, णेगंत णचंतिय (च) ॥६९२॥ वृत्तं, सव्वेसिं वणियाण एगंतिओ होइ किरियाइ छेदओ होति, कदाइ लाभओ, जइवि लाभओ तोवि अग्गिचोरादि सामण्णत्तणेण य जं खज्जइ दिज्जइ तेण आणचंतियं वदंतित्ति, जुज्जइ, एते दोऽवि पगारा अणेगंतिए, अथवा विपद अवार्या, दोऽवि पगारा अणुदए चेव, न लाभ इत्यर्थः, तद्विपरीतस्तु णिज्जरा उदयो, यत उच्यते से उदए से णिज्जरा लाभः, मोक्षगतस्य सादिअणंतत्वं अणंतप्राप्ते, अणंतपत्ते तं उदयं, लाभक इत्यर्थः, साहयति—आख्याति सिलाहति वा प्रसंसतीत्यर्थः, णातीति ज्ञातिः कुली, यः त्रायतीति त्राती, स चैकः एकान्तिकत्वाच्च परमलाभक इति, तदेवं वणिग्भ्यः भगवंतं सुमहद्भिर्विशेषैर्विशिष्टं संतं यत्नैः समाणीकरोषि तं पुनरयुक्तं, कतरैर्विशेषयन्ति णणु जे समारंभादिभिः पंचभिर्विशेषैराख्याताः, इमे चान्ये विशेषाः, तद्यथा—अहिंसकं(यं) ॥ ६९३ ॥ वृत्तं, अहिंसको भगवान्, ते हिंसका, सव्वसत्ताणुकंपी च भगवं ते णिरणुकंपा, दसविधे धम्मे ट्ठितो भगवं, ते तु वणिज्जा, किमत्थं धम्मे स्थित इति चेत्, कम्मविमोक्खणट्ठाए, पुनः कर्म्मविमोक्षार्थं अभ्युत्थिता, धनार्थं तूत्थिताः, तदेवं अणेगगुणसहस्सोपेतं, 'आयदंडे'ति आत्मानं दण्डयंति जीवोवघातित्वात्, समाचरति इंते सम आचरंता समाचरंता, तुल्यं कुर्वन्ता इत्यर्थः, समानयंतो वा समानं कुर्वन्त इत्यर्थः, एतद्धि तओअघोरमज्ञानं चेति, तमेवं प्रतिहत्य निर्वचनोऽयमितिकृत्वा चाजीवकपुरुषं गोशालं भगवंतमेव प्रति ययौ, तथार्द्रकेन गोशालमवधीरितं

गोशालक-निरासः


॥४२७॥

श्रीसूत्रकृताङ्गचूर्णिः ॥४२८॥

मत्वा द्वाभ्यां कारणाभ्यां तुष्टाः शाक्यपुत्रीया भिक्षवः, कथमिति चेत् यदेषो अस्माकं प्रत्यक्षतोऽनेन निगृहीतः, यच्चास्माकमिदानीं श्लाघा बहुपरिवारो राजपुत्रोऽस्माकमायास्यतीति, अतः गुणशीलमुद्यानं भगवत्समीपं प्रत्यायातस्य संबहुला भूत्वा बुद्धसिद्धान्तं ग्राहयिष्यामेति पुरस्तात्स्थित्वा भो भो भव्य महाश्रव आर्द्रकराजपुत्र स्वागतं ते ‘कुतः आगम्यते ?, क्व च यासीति’ स भगवत्समीपं यामि, इत्युक्ते भिक्षुका इयमूचुः–इदमपि तावदस्मत् सिद्धान्तं शृणु, श्रुत्वा च संप्रतिपद्यस्व, पण्डितवेदनीयो ह्यस्मत्सिद्धान्तः सूक्ष्मश्च चित्तमूलत्वाद्धर्म्मस्य, तदेव च नियंतव्यं, किं कायेन काष्ठभूतेन वृथा तापितेन ?, आह हि–‘मनपुव्वंगमा’ तथा चोक्तं–‘चित्ते तायितव्ये’ इत्येवं चित्तमूलो धर्म्मः, अधर्मोऽपि चित्तमूल एव स्यात्, कथं स धर्मश्चित्तमूलः ?, उच्यते, पिण्णागपिंडी ॥६९४॥ वृत्तं, जइ कोइ आमन्नवेरो वेरिओ जो बालरूवाई सोयति सो तेवि मारिए(रेइ), मारेतुं चेडरूवाइंपि मारेमित्ति ववसितो, सुव्वंति य केइ वेरिया जे गब्भेवि विगिंतिंति महिलाणं, मा एते वद्धमाणा सत्तुणो होहिंति, तत्थ समावत्तीए खलपिंडी पल्लंकए पोत्तेण ओहाडिता मन्दप्रकाशे गृहैकदेसे वा मो तेण तिव्ववेरामिभूतेण एस दारओत्तिकाऊगं सत्ति कुंतो वा सत्ती वा तिसूलं वा, एवं विद्धुं चिंतेति–कदायि एस अमम्मविद्धो जीवो, ता तहेव सूलप्रोतं अग्गिम्मि पयति, एवमेव अलाउयं वावि कुमारओत्ति पयति सूले विद्धुं अवेद्धुं वा, स प्रदुष्टचित्तत्वात् लिप्पति प्राणिवधेण अहणंतोवि सतं ‘अम्हं’ति अम्हं सिद्धंते, एवं तावदकुशलचित्तप्रामाण्यादिति, कुर्वन्नपि प्राणातिपातं प्राणघातफलेन न संयुज्यते अयमन्यः कुशलचित्तप्रामाण्यात्, अकुर्वन्नपि प्राणातिपातं तत्फलेन संयुज्यते, यत्रायं पाठः–अहवावि विद्धूण मिलक्खु सूले ॥ ६९५ ॥ वृत्तं, वा विभाषादिषु, मूलक्खूत्ति अणारिया अथवा आरिएवि जे मिलक्खुकम्माणि करेंति, स एवं मेच्छोपि भूत्वा क्षुधार्तः पिन्नागपिंडीयमिति कृत्वा पुरुषमपि

बौद्धनिग्रहः

॥४२८॥



श्रीसूत्रकृताङ्गचूर्णिः ॥४२९॥

शूलेण वेदुधुं अगणिकाए पएज्जा खाइत्तुकामो, कुमारगं वावि अलाउअबुद्धीए पउलेतुं खाइस्सामि तु पएज्जा, ण लिप्पति पाव-
बंधेण अम्हं, एवं तावदसाकं अपचेतनकृतप्राणातिपाते नास्ति, यद्यपि च भवानन्यो वा कश्चिन्मन्यते अनपाये अपायदेशी यथा
भवंतो मांसासिन इति तत्रापि अनभिसंधित्वादेरास्माकं त्रिकरणशुद्धं मांसं भक्षयतां नास्ति दोषः, कथं ?, इह हि-पुरिसं च
विदुधूण ॥६९६॥ वृत्तं, जइ कोइ अजाणंतो पुरिसं वेदुधुं कुंतेण वा सूलेण वा अप्पकाशावस्थितं कुमारकं वा बालमित्युक्तं, एतं
गिलाणभिक्खुस्स छिन्नभत्तस्स दुब्भिक्खादिसु जायतेए पइतुं पिंडीयमिति पओलितं सुगंधं सुहं खाइस्संति सती बुद्धिः तस्यां
कल्पति,'बुद्धाणं'ति नित्यमात्मनि गुरुषु च बहुवचनं, बुद्धस्यवि ताव कप्पति किमुत ये तच्छिष्याः?, अथ बुद्धिः पापापत्यानि बौद्धानि
तेसिं णं कप्पति पारणए भोजनायेत्युक्तं भवति, सर्वावस्थासु अचित्तं कर्म्मयायं न गच्छति, अविज्ञातोपचितं ईर्यापथिकं स्वप्रा-
न्तिकं चेत्यस्माकं कर्म्मचयं न गच्छति, एवं तावच्छीलमूलो धर्म्म उक्तः। अथेदानीं दानमूलः-सिणायगाणं ॥६९७॥ वृत्तं,
चतस्रो तासु त द्वादशसु भूतगुणेसु युक्ता, एतेसिं एवंगुणजातियाण अभिगत० यथा तस्यानन्दो दोण्णि सहस्से भिक्खुयाणं
भोजावेति समांसगुडदाडिमेनेटेन भत्तेन, तेण पुण्णखंध, संस्कारो नाम पंचधा, स त्रिविधः पुण्यः अपुण्यः सतिजा इति ते, तं
आरोधं, ते हि प्रक्षीणकल्मषप्राया: चतुःप्रकाराः आरोधा देवाः, ते भवन्त्याकाशोपकाः विज्ञानोपकाः अकिंचणीकाः णोसण्णिणो
दातारः, सर्वोत्तमां देवगतिं गच्छंतीत्यर्थः, महतां इति प्राधान्ये महाशब्दः, अथवाऽऽर्द्रकस्याऽऽमन्त्रणं क्रियते हे महासत्त्व ! इत्यर्थः,
तदेवमिह स भगवता बुद्धेन दानमूलो शीलमूलश्च धर्मः प्रणीतः तदेहि समागच्छ बौद्धसिद्धान्तं प्रतिपद्यस्व, इत्येवं बौद्धभिक्षुकैरुक्त
आर्द्रको आर्द्रकानादरयाऽव्याकुलया दृष्ट्या तान् दृष्ट्वोक्तवान्-भो शाक्या यद्भू जो पिण्णागं पुरिसबुद्धीए सूले विंधति पचति

बौद्धनिरासः

॥४२९॥

वा जानते य अलाउअं वा कुमारबुद्धीए किर लिप्पति पाणवधेण अकुशलचित्तो, अण्णो पुण पाणवधंपि करेंतो पयंतो पाणे कुशलेन चित्तेन मुचति पाणातिपातातो, तत्र ब्रूमः–अयोग्यरूपः ॥ ६९८ ॥ वृत्तं, इह न योग्यमयोग्यं, रूपमिति स्वभावेत्युच्यते, यथा कश्चित्केनचित् रोषतः प्रत्यपकारचिकीर्षुरन्तर्गतं भावमाविः कुर्वन् भ्रूकुटिं करोति रूक्षां खरां वा दृष्टिं निपातयति, उक्तं हि–‘रुट्ठस्स खरा दिट्ठी’ गाथा, एवं स्वभावे रूपशब्दं निवेश्य उच्यते अयोग्यरूपं क्रूरस्वभावमित्यर्थः, शिरस्तुण्डमुण्डनं कृत्वा प्रव्रजितोऽहमिति लिङ्गानुरूपां चेष्टां युञ्जते, आह हि–“वयं सकर्म्मणोऽर्थस्य” तेनोच्यते–अयोग्यमेतत् प्रव्रजितरूपस्य अहिंसार्थमुत्थितस्येहेति इहास्माकं प्रवचने, अहिंसार्थकं हस्तादिसंयता वा पावं तु, तुर्विशेषणे हिंसैव सर्व्वपापेभ्यः पापीयसी, प्राणाः पृथिव्यादयः, प्रसह्येति क्रौर्याद्बलादाक्रम्य, तुब्भेवि य प्रव्रजिताः शिरस्तुण्डमुण्डनं कृत्वा कषायवाससः स्त्रीवेषधारिणः संयता वयमिति सम्प्रतिपन्नाः, तेण तुब्भेवि अयोग्यरूपं हिंसादिबलाः जे तुब्भे संपडिवज्जह, मणुसादि प्रसह्य असमीक्ष्य कथं वयं प्राणिनो मारयामः मारापयामो वा तदुच्यते–नो मंता व अकुशलेण चित्तेण पिण्णागपिंडी खोडीं वा पुरिसोत्तिकाउं अलाउयं अण्णं वा तओ सालिफलं कुमारकोऽयमिति प्राणातिपातेन, आज्ञादोषो न युज्यते इति ब्रूमः, यत्तु पिण्णागबुद्धीए पुरिसंपि विद्धमाणो मारेमाणो वा कुमारगं वा अलाउअबुद्धीए ण लिप्पति पाणवहेण अम्हं सिद्धान्त इति वाक्यशेषः, ‘अबोधिए दोण्हवि’ अबोधिः–अज्ञानं तेण यदि अज्ञानात् मुच्यते प्राणवधात्तेनाज्ञानं श्रेयमितिकृत्वा, किं पुनरुच्यते–अविद्याप्रत्ययाः संस्काराः, सर्वसम्यग्दृष्टिप्रसङ्गश्चैवं प्रसज्यते, विरताविरतिविशेषणश्चैवं सति, अन्यथा वा का प्रत्याशा ?, निर्दयं ततो विकृताः, कथं ?, इहरहावि ताव लोगो दुक्खेण अहिंसत्वं कार्यते, तुब्भे य भणह मारेन्तो कुशलचित्तेन अहिंसओ भवति, तदेवं प्रकारं वो वचः ‘असाधु’ अशोभनं,

'दोण्हवि'त्ति तुब्भे य जे य पडिसुणंति अज्झावणे, हंतुंपि अणुतप्पति, ते परिचत्ता, हंतुं वीसत्था होहिंति, आह च—"केचित् शून्यं नष्टाः" यदि च अज्ञानमदोषाय तेन वैदिकानामपि परमात्मके श्रेयबुद्ध्या छक्काए घातयतां न दोषोऽस्ति, संसारमोचकानां च, घातयामिति किं भणह ?, तुब्भेंपि एवं रोचयति जहा असंचिंतेंतो कम्मबन्धो णत्थि ?, इत्यत्र ब्रूमः—उड्ढमहेयं ॥६९९॥ वृत्तं, चत्तारिति दिसाओ गहिताओ, पण्णवगं पडुच्च, विविधं विशिष्टं ज्ञात्वा विज्ञात्वा विज्ञाय, लीनमर्थं गमयतीति लिङ्गं, त्रसंतीति त्रसा, तिष्ठन्तीति स्थावराः, तेसु तसथावरेसु, किंच लिंगमेषां ? उच्यते—उवयोगो लिंगं लक्षणमित्यर्थः, आह हि—'निमित्तं हेतुरपदेशः' यथा अग्नावौष्ण्यं सांसिद्धिकलिङ्गमेवमात्मनां त्रसानां स्थावराणां च सांसिद्धिकलिंगं, येन ज्ञायते आत्मनाऽऽत्मेति, स चोपयोगः स्पर्शादिष्विन्द्रियेषु सुखदुःखयोरुपलब्धिरित्यर्थः, तच्च सर्वप्राणभृतां समानं लिङ्गं, सुखं प्रियमप्रियं दुःखं, तदेवं अत्ताणुमाणेणं 'भूताभिसंकाए(ड)दुगुंछमाणे' कता भूताइं संकंति तसथावराइं दुक्खाओ,तं च दुक्खं त्रसा वा दुगुंछंति, तस्मादुद्विजत इत्यर्थः, एवं जाणामि, णो वदेज्ज मारेंतो मुच्चति, दोसो णत्थि, करेज्ज वा णिस्संको प्रमादं, अण्णाणेण दोसो णत्थि, कुत एतद् ब्रूमो माया च कुचकुचा वा प्रवचनेऽस्ति ?, किंच—पुरिसेत्ति विज्ञप्ति ॥७००॥ वृत्तं, जं वा भणिसि पुरिसोऽयमितिकृत्वा पिण्णागपिंडीं अलाउअं वा कुमारगंति अकुशलचित्तो विंधमाणो अदोसोवि विज्ञानो विण्णुत्ति, एवं जहा हिंसकत्वे चिन्तिज्जमाणं ण युज्जति, अणारिए वा से पुरिसो भण्णति, अलाउअं वा कुमारबुद्धिए विचुतु, अज्ञानेन अस्य द्रोहः संपद्यते, एवमज्ञानेन चैवं पुरिसं पिण्णागपिंडीबुद्धीए कुमारगं वा अलाउयबुद्धीए विवाइन्तो किं च ण बज्झिस्सति, किंच—को संभवो ? पिण्णागट्ठताए संभवणं, संभूतं वा संभवः, कः पुरुषे सचेतने पिण्णागबुद्धिमुत्पादयिष्यति ?, निसृष्टसुप्तस्य च नोद्वर्त्तनपरिवर्त्तनाद्याः क्रिया भवन्ति तेन

संभवोऽस्ति पिण्णागपिंडपुरुषस्य, तंत उच्यते–नैतदेवं, यत एवं पिण्णागपिण्डे पुरुषस्य काष्ठे वा वस्त्राच्छादिते उपपत्तिरिति, अत एव किमसावेवमेतदुभयं जानमानो निस्संकं करेति, किमयं पुरुषः स्यात्पिण्डीकाष्ठं वेति स्यादिति, अथ सम्भवे विद्यमाने निशः ङ्कप्रहारी पठ्यते निर्मीमांस इत्यर्थः, एवं मे वायाप्यसौ कुशलचित्तेन पुरुषं पिण्णागपिंडीबुद्ध्या वातयति तस्याप्युभयं सम्भवत्वात् युक्तो विमर्शः–किमयं पुरुषः स्यात् उत पिण्णागपिंडी ?, एवं कुमारेऽपि अलाउकं स्यात्कुमारः स्यादिति, जम्हा न एवं संभवो दिट्ठो तम्हा य सहप्पगारा णत्थि, 'वाया वुइति'त्ति वुत्ता असत्या अशोभना, अथवा सत्य इति संयमः असत्य इति संयमवादी-त्यर्थः, निश्चयस्य निरनुकम्पा सद्रोहेत्यादि, किमंग पुण कम्मुणा ?, किंचान्यत्–वाग्व्यामियोगेन ॥ ७०१ ॥ उच्यते इति वाचा, वायाएवि अभियोगो अभिमुखो योगः अभियोगः अभिवाग्योगः, एवमुक्तं भवति–हवेज्जति हवति संयम ? इति वाक्यशेषः, कः पिण्डार्थः संवर्णीयः? वाग्व्यामियोगेण यदा हवति संयमं, जहा भणह मारेंतो अदोसोत्ति 'ण तासिं वायमुदाहरेज्जा' सद्रोहमित्यर्थः, अट्ठाणमेतं कुशला वदंति–यथा कण्टकाग्रं स्थाणं वा सलिलस्थास्थानं एवं तुब्भंपि इमं वयणं, अज्ञानदोषोऽस्तीति, अहिंसकादीनां गुणानामस्थानं अनवद्यभाजनमपि, निजे विस्थरेण दिक्खातो मोक्खत्थं मुद्धिं निसृत्य शिरस्तुण्डमुण्डनं कृत्वा ब्रूयात् 'सुराल'-मिति, सुरालमेतत्स्थूलं हिंसकत्वात् अदिक्खितस्सवि, किं पुण दिक्खितस्स ?, एवं असंचिन्तिते न कर्म्मबन्धो भवतीति अज्ञान-श्रेयसं सर्वसम्यग्दृष्टिप्रसङ्गश्चेति, वैदिकाः संसारमोचकाश्च निर्दोषाः एव भवन्मतेन. शाक्यं हेडयित्वाऽऽर्द्रको मुखीभूत्वा प्रपंचमाह लद्धे अट्ठे अहो एव तुब्भे ॥७०२॥ वृत्तं, लब्धः प्राप्तो यदज्ञानं श्रेयस्ततः किं ज्ञानाधिगमः क्रियते ?, कुतो एस तुब्भेहिं अट्ठो लद्धो जेण अजाणंता सव्वतो मुच्चति ?, बालमत्तोन्मत्तप्रमत्तादयः, अहो दैन्यविषयादिषु, दैन्यं तावत् जहा कोयि कंचि दिमूढं

श्रीसूत्रकृताङ्गचूर्णिः ॥४३३॥

उप्पहेण अडंतं दट्ठुं भणति–अहो अयमेवं वराओ किलिट्ठो किलिस्सति, एवं तुब्भे उम्मग्गपडिनन्ना मोहं किलिस्सह, सामूयेति विस्मये, अयं शोभनो अहो सिद्धान्तो यत्राचिंतितं कर्म्मचयं न गच्छति, कार्यकारीसमता एवं अयं जीवाणुभागे सुविचिंतयंता ॥७०३॥ वृत्तं, कश्चैषां अनुभागस्तनुसुखप्रियताः दुःखोद्विग्नता, तत्किमुक्तं भवति ?, एवं जीवाणुभागो सुत्तिओ भवति, यदुत सर्वसत्त्वानामात्मोपमानेन न किंचि दुःखमुदपप्तदिति, अहोशब्दः सर्वत्रानुवर्त्तते अहो वचस्तेन गुरुणा करतल इवामलकं सर्वलोकोऽवलोकितः, ज्ञात इत्यर्थः, किमुक्तमुच्यत इत्यर्थः, इति चेत् येनाज्ञानं श्रेय इति, स्यादेष भवतां किं चिन्तितः कर्म्मबन्धो भवत्याहोस्विदचिंतितो मोक्षो वेति, अत उच्यते–‘ओधारीया अन्नविधीए सोहिं’ मोक्ष इत्यर्थः, स्यात्करोत्यन्यो विधिर्येनार्या शोधिमिच्छन्ति, तत उच्यते, जहा छणणं, नापि संचिंतितं कर्म्म बद्ध्यत इति सिद्धान्तः, किं तर्हि ?, अस्माकं प्रमत्तस्य कर्म्म बध्यते, अप्रमत्तस्य मुच्यते, अप्रमत्तः शुद्ध्यत इत्यर्थः, एवं शोधिराहुराचार्याः, ण वियागरे ण वाकरेंति, छद अपवारणे, छज्जते तस्स छन्नं छन्नमप्रकाशमदर्शनमनुपलब्धिरित्यनर्थान्तरं, पदं चेष्टितं, छन्नपदेन उपजीवनधर्म्मा छन्नपदोपजीवि, कथं ?, अजाणस्स बंधो णत्थि तहा ण वियागरे, छण्णपदोपजीवि, पठ्यते गूढविजागरे छणणपदोपजीवि, छण हिंसायां छणणमेव पदं छणणपदं ततो वागरेज्जा, जहा अजाणंतस्स कम्मबंधो णत्थि, ते एवं श्रोतॄणां निर्देयादयो दोषाः, स्यात्किं व्याकरितव्यं कथं न ?, उच्यते, जहा छणणं न होति जीवाणं, अज्ञानकृते तु बंधो णत्थि उच्यमानेन प्रमादं करिष्यति, तेण छणणं अनुज्ञातं भवति, तदेष पिण्डार्थः– जहा छणपदोपजीवि ण छणणपदोपजीविणो वाकरेंतीति वाक्यशेषः, तहा ण वियागरेज्ज, अयं इदानीं आपोऽर्थः, जीवाणुभागं अनुचिन्तयतो वियागरे अछणपदोपजीवि, एकारात्परस्य लोपे कृते छणपदोजीवि भवति, अचिंतिते कर्म्मबन्धो नास्ति ण च साधु

सांख्य-बौद्धनिरासः

॥४३३॥

वियागरे, अछणपदोपजीवि 'एसोऽणुधम्मो' अनु पश्चाद्भावेऽनुधर्म्मस्तीर्थकराचीर्णोऽयमुपचर्यते इति अनुधर्म्मस्तीर्थकरानुधर्म्मिणः साधव इहेति, इह प्रवचने संजयाणं एवं सीलं, न घटते भवतां, जोऽवि अ तुज्झं अशीलमंताणं देति सोऽवि अप्येवं बध्यते, ण मुच्यते, जं भणसि–**सिणातगाणं तु दुवे सहस्से** ॥ ७०४ ॥ वृत्तं, सिणातगा सुद्धा द्वादशधूतगुणचारिणो भिक्षवः, जेवि दोऽवि सहस्से भुंजावेति सोवि ताव मुचति, किं पुण जो एकं वा दो वा तिण्णी वा, एते णिच्चं दिणे दिणे असंजता लोहितार्द्र-पाणि सद्यघातीत्युक्तं भवति, गर्हा-निन्दा इत्यर्थः, ज्ञानाद्यार्याणां धर्मः अज्जः, जइ लोके भिक्षुकाणां च गरहितो धर्म्मः अजाण-माणाणं, इह हिंसानुज्ञानात् अपात्रदायकत्तिकाउं गरहितो, सावद्यं छक्कायवधेण, अजयाणं अपात्रेषु व दिज्जमाणं, कर्म्मबन्धाय भवति, इतश्च तुब्भे य अपात्राणि दक्षिणाया इत्यर्थः, जेण मंसं खायह तह णत्थि एत्थ दोसो, अहवा शीलं तुज्झं दूसितं दाणंपि ण जुज्जति, इतश्च शीलं नास्ति, जं भणह–**थूलं उरब्भं०** ॥७०५॥ वृत्तं, 'थूलो'ति महाकायो उपचितमांसश्चेह लोके शाक्यधर्म एव मारेह, यथा शाक्या उद्दिसितुं भिक्षुसंघं प्रकल्पयंतः, केण साधेंति ?, तं लोणतेलपिप्पल्यादीनि वेषणाणि गृहीतानि हिंगु-कुच्छंभरादीनि वाऽन्यानि, तमेवमादीहिं वेसणेहिं भिक्खूट्ठाए पकरेंति। **तं भुंजमाणा पिशितमिति** ॥ ७०६ ॥ वृत्तं, मांसं प्रभूतमाकृष्टाय बहुप्रकारं वा, अप्येवं दिणे दिणे णेव लिप्पामो वयं, कस्मात् ?, त्रिकरणशुद्धत्वात्, इच्चेवमसाकं, अहं खु बुद्धः तेन प्रमाणमित्यतस्तत्प्रामाण्याद्भपामः, तदुच्यते–'इच्चेवमाहंसु, अणज्जबुद्धो वा अण्णे वऽज्जे केइ एवमक्खातवन्तः साम्प्रतं आइ-क्खंति वा मांसदोषमिति, सर्वे ते अणारिया बाला मूढा रसेसु, रसशब्दो वा सुखे भवति, सुहेसु विसएसु, सुहे गिद्धा। **जे यावि भुंजंति** ॥७०७॥ वृत्तं, जे य बुद्धा वा अबुद्धा वा पुत्रमांसोपमं मांसं प्रदोषंतिकाउं भुंजंति, चशब्दादुपदिशन्ते मांसमदोषमिति,

सेवंति ते पावमजाणमाणा, हिंसादी उपार्जयन्तीत्यर्थः, अहवा ते मांसासिणां णिरणुकंपं जीवेसु वुद्दसंज्ञिकं पावं सेवंति, तद्दोषम- जानमानाः, अथवा जावंणं मंसखायणेण पावं बज्झति तं च तुमं पावं अजाणमाणो, जहा एत्थ वधाणुमाणागतं घणं चिक्कणं पाव बज्झति, तेण खणं ण, एवं कुशला वदंति तंमि मांसादे, सुद्धे, मांसभक्षणोपदेसएण एवं तच्छमाणे कुव्वंति भुक्तिमीत्यर्थः मंस- भक्षणे, वा अथवा 'मणं ण एतं सुद्धं, कुशला जाणका मनज्ञाना मणंपि न कुव्वंति ज्ञातपुत्रीया, वतीति एसा मंसमदोसंति वुइया असचा, किल कम्मणो कर्तुः, स्यादुद्दिष्टं भक्तं, उच्यते–सव्वेसि ॥७०८॥ वृत्तं, पाणा पृथिव्यादयः तेसिणिकायं णिक्खिप्प, दंडो मारणं, सहावज्जेण सावज्जं पचनपाचनानुमोदनानि, यो वाऽन्येन प्रकारेण दंभनवाहनमारणा, दण्डं सावज्जं दोसं परिवज्जयित्ता 'तस्संकिणो' वा, शंक ज्ञाने अज्ञाने भये च, ज्ञाने तावत्कथं जानमानः उद्दिश्य कृतदोषं तं गृह्णीयात्, अज्ञाने संकितो कंखो वितिगिच्छासमावण्णो संकमाणो, भए 'आहाकम्मण्णं भंते! भुंजमाणे किं पगरेंति?, उच्यते अट्ठकम्मपगडीओ सिढिलबंधण- बद्धाओ धणित०' एवंविधा संका जेसिं ते भवंति तस्संकिणो इसिणो णातपुत्ता णातस्स पुत्ता ते भूताभिसंकाए दुगुंछमाणा ॥७०९॥ वृत्तं, जम्हा भूतो भवति भविस्सति तम्हा 'भूते'ति, संका भये ज्ञाने अज्ञाने च पूर्वोक्ता, इह तु भए द्रष्टव्या, तच्च मरणभयमेव, मारेमाणेहिं इह परत्र च संकते विभ्यत इत्यर्थः, इह तावत्प्रतिवैरस्य संकते बंधवधरोहदंभणाणां च, परलोए णर- गादिभयस्स, उक्तं च–"जो खलु जीवं उद्वेति एस खलु परभवे तेहिं वा अण्णेहिं वा जीवेहिं उद्विज्जति" इह लोके तु भयेण 'सव्वेसु पाणेसु'त्ति पाणा एगिंदियादिया आयुः प्राणादि, घाइणो घातयति निक्षिप्यते, एवं समणुण्णाते, 'तम्हा ण भुंजंति' तस्मा- द्वाऽनुमत्याः कारणात् इहपरलोकापायदर्शनाच्च न भुंजंति 'तहप्पगारं' अन्यदपि जं साधुं उद्दिश्य तं कृतं 'एसोऽणुधम्मो, जहा लोए

अणुराइणो धम्मो, उक्तं च–"यद्यदाचरते श्रेष्ठः" तथा "देशे २ दारुणो वा सिवो वा" एवमिहापि, अनु पश्चाद्भावेतिकृत्वा तीर्थकरगणधरैर्हि वर्जितमुद्देशितं, तदनु तच्छिष्याः अपि परिहरंति, अथवा अणुः सूक्ष्म इत्यर्थः, सूक्ष्मो धर्मो भगवता प्रणीतः स्तोकेनाप्यतिचारेण बाध्यते शिरीषपुष्पमिव तदनुतापेन, संयताः साधवो, णिग्गंथधम्माण (धम्मंमि) ॥ ७१० ॥ वृत्तं, णिग्गंथस्स धम्म एव येषां धर्मः तेण भवंति णिग्गंथधम्मणो, अथवा णिग्गंथो भगवानेव, गंथा अतीता अत्ता, चेअणभूतेण णिग्गंथेण तुल्लो जेसिं ते भवंति णिग्गंथधम्माणः, तत्सदृधर्माणः इत्यर्थः, इमो इति प्रत्यक्षीकारणे, समाअधिः समाधिः मनः-समाधानमित्यर्थः, अथवा मणस्स हि इहेव समाधी भवति, द्वन्द्वाभावात्, परमसमाधी य मोक्षो, ये पुनः पचनपाचनरता आरम्भ-प्रवृत्ताश्च तेषामनेकाग्रीभावः, कुतः समाधिः ?, उक्तं हि–"स्नानाद्या देहसंस्काराः" समणे भगवं महावीरे इति खलु से भगवं महावीरे समन्तात् ग्राप्नोति, मोक्षमित्यर्थः, इहार्चनं श्लोकं च प्राप्नोति, श्लाघा कथने, श्लोको नाम श्लाघा, कथं श्लाघ्यते ?, इहैव तावत् उराला कित्तिवण्णसद्दसिलोगा परिवुअंति इति खलु समणे ३, परत्तंमि सिद्धे बुद्धे, तहा वा "णवि अत्थि माणु-साणं" परत्र च श्लोकं प्राप्नोति, श्लाघामित्यर्थः, यस्तु अबुद्धोऽशीलगुणोपपेतः पचनपाचनाद्यारम्भप्रवृत्तः सातबहुलस्नानादि-शरीरसंस्कारग्रामादिपरिग्रहे व्याप्रियमाणोऽसमाधियुक्तः इहेति निन्द्यो भवति यथा "ग्रामक्षेत्रगृहादीनां" तथाऽऽहुः–"यथाऽपरे संकथिका" भावबुधास्तु तच्छिष्या श्लाघ्या भवन्ति "नैवास्ति राजराजस्य तत्सु०" स एवं तान् शाक्यान् सप्रपंचं निहत्य भग-वतामेव प्रतिपत्तिमान् ऊर्द्धज्वलद्भिर्धिग्जातिभिः परिवार्यापदिश्यते–भो आर्द्रक राजपुत्र ! मा तावद्गच्छ, तावदस्माकं वेदसिद्धान्तं शृणु तद्यथा–आदिसर्गे किल विष्णोर्नाभ्यां समुत्पन्नं पद्मं नैककेसराकुलं, तस्मिन् ब्रह्मा समुत्पन्नस्तेन सृष्टमिदं जगत्, स मुखतो

श्रीसूत्रकृताङ्गचूर्णिः ॥४३७॥

ब्रह्मणोऽसृजत्, ततः शूद्रांस्त्रिवर्गपरिचारकान्, क्षत्रियान् सु०, एकमेव वर्णं परिचरन्ति, तत एव च श्रेयोऽवाप्नुवन्ति, यस्मा-, चैवं तस्माद् ब्रह्मोत्तरं जगत्, तदेवं त्रयाणामपि वर्णानां ब्राह्मणा एव पूज्यतमाः, आह च-"ब्राह्मण एव जायते०" ते च द्रव्य-क्षेत्रकालभावोपधानशुद्धेन दानेन पूजनीयाः, तत्तेनोपधानशुद्धेन गोहिरण्यसुवर्णधणादीनि देयानि, क्षेत्रशुद्धमपि स्वगृहेऽभ्यागत-स्नानाविस्कृतक्रियस्य सुखासनासीनस्य, अथवा क्षेत्रशुद्धं पुष्करादिषु क्षेत्रेषु दीयते क्षेत्रमिदं विरूपातं, कालशुद्धमपि दर्शपूर्णि-माऽमावास्यासु, तथा अन्येषु च सर्वेषु पर्वस्विति, तथा चाह-'अतुष्याण्यत्रिरात्राणि, तीर्थान्यनभिगम्य च । अदत्वा काञ्चनं गाश्च, दरिद्रस्तेन जायते ॥ १॥' भावोपधानशुद्धमपि लोकप्रत्युपकारादित्यतः अदिन्नए यदीयते तद्भावोपधानशुद्धं, अभावो, भावस्तु पात्रमित्यर्थः, पात्रशुद्धमेव हि शुद्धिमुत्पादयति, अहन्यहनि दातव्यं, तत्र पात्रशुद्धिमधिकृत्योच्यते-**सिणायगाणं तु दुवे सहस्से** ॥७११॥ वृत्तं, स्नातकाः शुद्धात्मानः, यज्ञादिषु षट्कर्माभिरताः, अथवा स्नातकादि इति वेदपारगाः प्रवक्तारः, आह च-"समं न ब्राह्मणे दानं" ते यदात्मानं पात्रीकृत्य केवलं परानुग्रहार्थमेव परिगृह्णन्ति तदा दातारमात्मानं च तारयति, तत्परिमाणं दुवे सहस्से, तेसु च एगदिणेण बहुएहिं वा दिणेहिं दोण्णि सहस्सेहिं पूरेंति जो भोजयतीति, बद्धानुलोम्या भोजये-ज्जेति, येचि दिणे दिणे, णेकतियं वा णितियं एगे अणेगे वा भोजावेति सदक्षिणे वा जपेय पौंडरीकादी वा यज्ञं यजते, तत्फल-प्रसिद्ध्ये त्वपदिश्यते, ' ते पुण्णखंधे सुमहऽज्जणित्ता ' ते इति ते प्रागुपदिष्टाः द्रव्योपधानशुद्धैर्दानैः स्नातकब्राह्मणपूजयितारः, पुनातीति पुण्यं, स्कन्धग्रहणात् सुमहत्पुण्योपचयं सम्यगुपार्जयित्वा, परत्र ब्रह्मेन्द्रप्रजापतिविष्णुलक्षादिषु देवा भवन्तीति प्रद-र्शनार्थः, यथा तावत्परसमये क्रियावद् गुणवद् समवायि कारणमिति द्रव्यलक्षणं, समयेऽपि इच्चेएहि छहिं जीवनिकाएहिं,वेदानां

जातिवाद-निरासः-

॥४३७॥

वादो वेदवादो, वेद एव हि परं प्रमाणं, आह हि–"वेदाः प्रमाणं" एवं त्रयी वर्त्तमानमाश्रित्य, राज्यं गत्वा राज्याभिषेकं प्राप्य इष्टेभ्य स्नातकेभ्यः ब्राह्मणेभ्यः गोहिरण्यादीनि दानानि त्यजस्व प्रयच्छस्व, आह च—"यान् यान् कामान् ब्राह्मणेभ्यो ददाति तान् कामान् प्रजनोपभुक्ते" यज्ञांश्च भूहिरण्यदक्षिणां यजस्व, आह च–"जइत्ता विउले जण्णे" तदेवं श्रेयसीमवाप्स्यति,तत्कथं ?, यदा ह्येतानि यथोद्दिष्टानि धर्मसाधनानि अभ्युदयिकं धर्म्ममुद्दिश्य करोति तदा नापवर्गमवाप्नोति, यदा त्वपवर्गमुपदिश्य धर्मसाधनेषु वर्त्तते तदा अपवर्गमवाप्नोति, तदेवं स्वर्गापवर्गफलं वेदानां धर्म्मं प्रतिपद्यस्व, किं तैर्जिनैः संयमपुरस्सरैस्तपोभिः अपार्थकैराचीर्णैः ?, तानेवं जात्यादिमदोद्धतां संसारमोचकतुच्छधर्मा भगवानार्द्रक उवाच–यद् ब्रूत जातिशुद्धा षट्कर्मनिरताश्च शीलमन्तरेणापि स्नातका ब्राह्मणा भवन्ति, कथं ?, व्याधकोपाख्यानात्, आह हि–"सप्त व्याधा दशार्णेषु" तथा च "सद्यः पतति मांसेन' किंचान्यत्–"वर्णप्रमाणके", अथवा पञ्चभिरिमैः कारणैः ब्राह्मणत्वं न घटते, तद्यथावत्–"जीवो जातिस्तथा देहः" एवं च श्लोकः, किंचान्यत् "विद्याचरणसंपन्ने" तथा चाहुः "न जातिर्दुष्यते राजन्" यस्त्वभिप्रेतं 'यजनादिप्रवृत्ता ब्राह्मणा भवन्ती'ति (तन्न) कस्माद्विसकत्वात् यज्ञस्य,आह हि–"पड् शतानि नियुज्यंते" न च हिंस्रान् भोजयमानस्य स्वर्गोऽपवर्गो वा भवति,तन्नोदाहरणं लोकमिव। **सिणायगाणं तु दुवे सहस्से** ।७१२॥ **वृत्तं**, स्नातका ग्रामारण्या वा विडालमूषकादिमांसाशिनः किलाहारकाः स्युः, ते स्नातकत्वे सति क्षुदार्त्ताः परिमाणंता च द्वे सहस्रे णितिए णिच्चे–दिणे दिणे वा दो सहस्साणि अधिगाणि वा कुत्सितं रौतिर्लीयते वा मार्जारा 'से गच्छति लोलुवसंपगाढे' एवं हि सपापो लोलुपः स्वाभाविकैः शीतोष्णाभिः परस्परोदीरितैः संक्लिष्टासुरोदीरितैश्च दुःखैर्भूमिगता अभिगता लोलुप्यन्ते लोलविज्जंते वा भृशं गाढं तीव्रं, एवं शीताद्याः स्वाभाविकाः परकृता वा तीव्रा-

श्रीसूत्रकृताङ्गचूर्णिः ।४३९॥

नुभावा येषु अनु पश्चाद्भावे जेहिं अण्णे सत्ता दुःखेहिं ताविता ते पच्छा दुःखमनुभवंतीत्यनुभावः णरकः उक्तः, पठ्यते च–तीव्राभितावी, तिव्वं अभितावेति जे चिति ततोऽधीको अभितावो जेसु णरएसु ते तिव्वाभितावा णरका तीव्रमित्येकोऽर्थः, सेविनो, जहा सो कुललभोजी णरगं गच्छति जण्णिका ते वराते मारेमाणा, ये चान्ये पापके तृणकाष्ठगोमयाश्रिता संस्वेदसिताः महीसिता चेव कृष्णादिषु च कर्म्मसु वर्त्तमाना बहून् जीवान् घातयन्ति ते च विषयोपभोगदृष्टान्तसामर्थ्याद्धिंसामेव प्रज्ञापयंति ब्रुवन्ति च, "आततायिनमायातं, अपि वेदान्तगं रणे। अहत्वा बह्वहतो वा, हत्वा पापात्प्रमुच्यते ॥१॥ तथा च शूद्रं हत्वा प्राणायामं जपेत्, विहस्सतिकम्मं वा कुर्यात्, यत्किंचिद्वा दद्यात्,तथा 'अनस्थीकानां शकटभारं मारयित्वा ब्राह्मणं भोजयेत्',एवं ते हिंसकं धर्म्मं देशंतो जहा कुलाला कुलपोसगा य णरए पचयंति एवं तेवि द्विजा हिंसकत्वात् कुलाला एव नरकं वचंति, जेवि तेसिं देंति तेवि कुलपोसगा, इह सह तेहिं णरगं वचंति। तएवं दयावरं धम्मं ॥७१३॥ वृत्तं, दूसेमाणो दया परा जस्स दयाण्णः, दमो वा दया वा वरा जस्स स भवति दयावरः, यः किल आततायिनमायातं न घातयति सो णरगं गच्छति, बहावहं धम्मं वधा पराः वधादिति पंचमी, वधाद्धि परो धर्म्मः, कथं ?, आह हि–"हत्वा स्वर्गे महीयति" तथा चाह–"अपि तस्य कुले जायासद्दो" ण उ तमेवं वधावधं पसंसमाणा एगंपि जे भोजयती कुशीलं, प्रगाहस्य ग्रहणं कृतं भवति, यत्रायं पाठः–'दयावरं धम्म दुगुंछमाणो' वधावधं पसंसमाणा एगंपि' अथवा दया परिगृह्यते, दयावरं धम्मं दुगुंछमाणा, वधावधं धम्मं पसंसमाणा, एवं प्रकारा दया एगंपि भोजयति कुसीलं, किं बहुए ?, कुत्सितं शीलं कुशीलः हिंसाद्याश्रवद्वारप्रवृत्तको हिंसकधर्मोपदेशको, अणिधो णिधं णाम अवः उत्सितं अधिकारं, दुरुत्तरं नरकमिति वाक्यशेषः, अन्तकाल इति मरणकालः। तानेवं बह्वतिनः प्रतिहत्य भगवानार्द्रको भगवन्तमेव प्रति

जातिवाद-निरासः-

॥४३९॥

